* श्रीमथुरेशो जयति *

अलवरराष्ट्रप्रभाव, निरतो नयरातिरातिमहाः ।
श्रीजयसिंह उदार, मतिविभवप्रथितो जयति ॥

THE

YAKARANA-MAHABHASYA

OF

PATANJALI

(Ahnikas I-II)

FOR THE SHASTRI EXAMINATION

EDITED AND PUBLISHED

BY

PANDIT BALASAHAYA SHASTRI

(OF ALWAR)

LECTURER IN

SANSKRIT AND HINDI

KINNAIRD COLLEGE FOR WOMEN,

LAHORE.

1925.

छात्रोपयोगि

पतञ्जलिमुनिविरचितं

पाणिनीय-व्याकरण महाभाष्यम्

(प्रथमाध्याय प्रथमपादस्याह्निकद्वयम्)

सर्वतन्त्रस्वतन्त्राणां

महामहोपाध्याय पं० शिवदत्त शर्मणाम् अधिष्ठातृतायाम्
अलवरवास्तव्य पं० बिहारीलालशर्मतनूजेन
पण्डित बालासहाय शास्त्रिणा
संपाद्य प्रकाशितम्।

प्राप्तिस्थानम्--
मेहरचन्द्र लक्ष्मणदास, संस्कृत पुस्तकालय
सैदमिट्ठा बाजार लाहौर।

'अमृत प्रेस' इत्याख्ये अमृतधारा भवने प्रिण्टर ला० दुर्गादास
अग्रवाल इत्यस्य प्रबन्धेन मुद्रितम्।

मूल्यम् } सन् १९२५ { १) रूप्यकः

निवेदनम् ।

सन् १९२७ तो व्याकरणमहाभाष्यस्याह्निकद्वयं शास्त्रिपरीक्षायै पाठ्यपुस्तकत्वेन नियतीकृतमिति जानन्त्येवाध्यापकमहाभागा अध्येतारश्च । परमेतादृशपुस्तकस्याभाव एवासीत् । यान्यपि सन्ति निर्णयसागरादिमुद्रितानि पुस्तकानि तानि नवाह्निकपर्यन्तानि, ततोऽप्यधिकानि वा, अधिकमूल्यानि च । अत इमां न्यूनतां पूरयितुमस्माभिरिदमाह्निकद्वयात्मकं पुस्तकं संपाद्य प्रकाशितम् । शैली चात्रैतादृशी संनिविष्टा यया स्वल्पप्रयत्नेनैव सर्वोऽपि विषयः सुगमो भवेत् । आशास्यते शैलीयं पाठकमहोदयानां छात्राणां च रुचिकरी भविष्यतीति । यत्र तत्र वाक्यानामन्वेषणं कृत्वा तेषां स्थान परिचयष्टिप्पण्यां दत्तः । यथास्थानसमायातानां सूत्राणामष्टाध्याय्यनुसार्यङ्का यथास्थानसमायातानां कार्याणाञ्च सूत्राणि तत्तस्थानीयटिप्पण्यां दर्शितानि । क्वचित्स्थले या विशेषटिप्पणी दृश्यते सा विदुषां विनोदायैव मन्तव्या ।

इदं महाभाष्यं पाणिनेः सूत्राणां विवरणरूपो महान् ग्रन्थः । तस्यैवायं प्रथमाध्यायस्य प्रथमपादस्याह्निकद्वयरूपोऽल्पीयान् भागः शास्त्रिपरीक्षोपयोगित्वेन मुद्रापितः ।

अस्य महाभाष्यस्य निर्माता श्री शेषावतारत्वेन प्रसिद्धो भगवान् पतञ्जलिरास्ति । अस्य देशः गोनर्दाख्यः[1] ।

अस्य महाभाष्यस्य निर्माणं पुष्प(ष्य)मित्रराज्ये तदनन्तरं वा भूदित्येतद्ग्रन्थसमायातैः 'चन्द्रगुप्तसभा' 'पुष्पमित्रसभा' 'पुष्पमित्रो यजते' 'याजका याजयन्ति' इत्यादि वाक्यैरनुमीयते । पुष्पमित्रराज्य कालस्तु महाभारत विष्णुवायुपुराणावलोकनेन कलेः १७९७ गताब्देषु (१२९८ B. C. शताब्द्यां) प्रतीयते । तत्संगतिर्यथा :—

अन्तरे चैव संप्राप्ते कलिद्वापरयोरभूत् ।
स्यमन्तपञ्चके युद्धं कुरुपाण्डवसेनयोः ॥ अदिप०

इति महाभारतोक्तेः द्वापरान्ते (३१०१ B. C.) महाभारतयुद्धे सहदेवमरणं 'संग्रामे भारते तस्मिन् सहदेवो निपातितः' इति वायुपुराणे (उत्तरखण्डे अ० ३७ श्लो० २९१) मत्स्यपुराणे च (अ० २७१ श्लो० १९) उक्तम् । सहदेवोत्तरं जातानां राज्ञां प्रतिराजं निर्दिष्टानि राज्यवर्षाणि अस्माभिः संक्षेपरूपेण प्रदर्श्यन्ते—

---

१ अयं च गोनर्ददेशः कश्मीरेषु इति प्राञ्चः । अयोध्याप्रान्ते (मध्यरेखातः ६°, १०′ पूर्वस्याम्, अक्षांशाः २७°,७′ उत्तरस्याम्) इति पौरस्त्याः ॥

सहदेव मरणोत्तरं सोमाधिमारभ्य बृहद्रथपर्यन्तं द्वाविंशती राजानः वर्षसहस्रं (आ २१०१ B. C.) राज्यं चक्रुः ॥ तदनन्तरं प्रद्योतमारभ्य वर्ति(नन्दि)वर्धनपर्यन्तं पञ्च नृपा अष्टात्रिंशच्छतं वर्षाणां (आ१९०६३ B. C.) राज्यं चक्रुः। तदनु शिशुनाकमारभ्य महानन्दि पर्यन्तं शैशुनाकाः दश नृपाः द्विषष्ट्यधिकानि त्रीणि शतानि वर्षाणि (आ१५९९ B. C.) राज्यं चक्रुः। तत्पश्चात् महापद्मः (नन्दः) अष्टभिः सुतैः वर्षशतं (आ १४९५ B.C.) राज्य चकार॥ तदनु कौटि(ट)ल्येन राज्ये स्थापितं चन्द्रगुप्तमारभ्य बृहद्रथपर्यन्तं नव भूपालः पूर्णं सप्तत्रिंशच्छतं वर्षाणां (आ १३५८ B. C.) राज्यं चक्रुः। तदनु पुष्पमित्रः बृहद्रथमुद्धृत्य षष्टिं समाः (आ१२९८ B. C.) राज्यं चकार। वायुपुराणोत्तरखण्डे अ० ३७। श्लो० २९२-३२३)। एवंमेव विष्णुपुराणेपि (चतुर्थांशे अ० २३, २४)।

एष एव कालः निर्णयसागरमुद्रितमहाभाष्यभूमिकायामपि युधिष्ठिरशककल्यब्देषु ६५३ व्यवकलनेन B. C. (ख्रिस्तप्राक्तन) वर्षेषु ६५३ संकलनेन समायाति।

Bohtlingk, Max Muller, Weber, Goldstrucker, Principal Raghubar Dayal, प्रभृतयो महोदयाः स्वस्वमतानुसारं ख्रिस्ताब्दात् पूर्वं २५० वर्ष-मारभ्य तदीय ६० वत्सरपर्यन्तं महाभाष्यस्य निर्माणसमयं मन्वते। ये विचारा एभिर्महोदयैः पतञ्जलिविषये तद्भाष्यविषये वा प्रकाशिता स्तेऽधोलिखितग्रन्थेषु समवलोकनीयाः।

1. Indian Antiquary 1, 299 II. 59, 61, 69, 206, 238. III, 14. XII, 353. XIV, 82—83 XVI, 156, 172. XLI, 272.
2. Max Muller's History of Anceint Literature. P. 2‧4
3. Weber's Indian Literature. P. 224.
4. Goldstrucker's Panini. P. 234.
5. Raghubar Dayal's Seclections from Sanskrit Prose. P 11-12

यतो ऽस्य ग्रन्थस्य मुद्रणं त्वरया जातमतः संभाव्यते संशोधनसमयेऽक्षरयोजकैः कृताः काश्चिदशुद्धियो न परिहृता भवेयुस्ताः क्षमाशीलैः विद्वद्भिः संशोध्याः।

यद्यपि मादृशेन जनेनैतादृशस्य पुस्तकस्य संपादनं साहसमात्रमेव तथापि 'आज्ञा गुरूणां ह्यविचारणीये'ति मत्वा श्रीगुरूणामाज्ञापालने नितरामस्मि क्षन्तव्यागाः।

पञ्जाब यूनीवर्सिटी लाइब्रेरी
लाहौर; आश्विन शु० २ सं०१९८२ } विदुषामनुचरो

बालासहाय शर्मा

DEDICATED

TO

A. C. WOOLNER ESQ.,

M. A. (OXON).

PROFESSOR OF SANSKRIT

AT THE

UNIVERSITY OF THE PUNJAB,

PRINCIPAL OF THE

ORIENTAL COLLEGE, LAHORE,

DEAN OF

UNIVERSITY INSTRUCTION,

ETC. ETC.

As a humble tribute to his vast learning and noble qualities of head and heart

by

P. BALASAHAYA SHASTRI.

NATIONAL ART PRINTING PRESS ANARKALI LAHORE.

* श्रीः *

पतञ्जलिमुनिविरचितं

पाणिनीय-व्याकरणमहाभाष्यम् ।

शास्त्रारम्भप्रतिज्ञावाक्यम्—	अथ[1] शब्दानुशासनम् ।
स्ववाक्यव्याख्यानम्—	अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ।
पूर्वपक्षभाष्यम्—	केषां शब्दानाम् ? ।
समाधानभाष्यम्—	लौकिकानां वैदिकानां च ।
लौकिकशब्दप्रदर्शनम्—	तत्र लौकिकास्तावत्-गौः, अश्वः, पुरुषः, हस्ती, शकुनिः, मृगः, ब्राह्मण इति ।
वैदिकशब्दप्रदर्शनम्—	वैदिकाः खल्वपि— शं नो देवीरभिष्टये[2] ।

१—मेधातिथिर्मनुव्याख्याता प्रथमश्लोकव्याख्याम्—पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनाभिधानमाद्रियते तथाहि भगवान् पाणिनिरनुक्त्वैव प्रयोजनम् 'अथ शब्दानुशासनम्' इति सूत्रसंदर्भमारभते ।

सायणमाधवस्तु ऋग्वेदभाष्योपोद्घाते 'अथ शब्दानुशासनम्' रक्षोहागमलघ्वसंदेहाः प्रयोजनम्' इति वार्तिककारस्य वार्तिके इति प्रकाशितवान् । परञ्च 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकतः प्राक्तनः सर्वोपि ग्रन्थः भाष्यकारस्यैव इति सर्वेषां कैयटनागेशादीनां संमतम् इति प्रपञ्चितं परीक्षोपयोगि-'वेदकापी' पुस्तके निर्णयसागरमुद्रितमहाभाष्यटिप्पण्यां च ।

२—ऋ० सं० १०. ९. ४ ; ऋ० खि० १०. १२७ १३ ; अ० सं० १. ६. १ ; सा० सं० १. ३३ ; वा० सं० ३६. १२ ; का० सं० १३. १५ ; ३८. १३ ; गो० ब्रा० १. १. २९ ; तै० ब्रा० १. २. १. १ ; २. ५. ८. ५ ; तै० आ० ४. ४२ ४ ; आप० श्रौ० ६. ४ १ ; १६. १४. १ ; १६ ३ ; मा० श्रौ० ६. १. ५ ; आश्व० गृ० १ ५ ७

इषे त्वोर्जे त्वा[1]।
अग्निमीळे पुरोहितम्[2]।
अग्न आयाहि वीतय[3] इति।

शब्दपदार्थजिज्ञासाभाष्यम्— अथ गौरित्यत्र कः शब्दः ?।

द्रव्येशब्दत्वाशङ्काभाष्यम्— किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः ?।

द्रव्ये शब्दत्वनिराकरणभाष्यम्—नेत्याह। द्रव्यं नाम तत्।

१—वा० सं १. १. २२ ; ७. ३० ; १४. २२ ; तै० सं० १. १. १. १ ; ३. ७. १ ; ९. २ ; ४. ३. ७. २ ; ६. ३. ६. १ ; ९. ३ ; मै० सं० १. २. १५ ; २४. ८ ; १. २. १६ ; २६. १५ ; १. ११. ३ ; १६४. ३ ; २. ८. ३ ; १०९. २ ; २. ११. ६ ; १४४. ३ ; ३. ९. ६ ; १२३. १३ ; ३. १०. १ ; १२९. ७ ; ४. १. १ ; १. १० ; का० सं० १. १, १० ; ३. ४ ; १७. ३ ; गो० ब्रा० १. १. २९ ; तै० ब्रा० ३. २. १. ३ ; श० ब्रा० १. २. २. ६ ; ७. १. २ ; ४. ३. १. १७ ; ८ ३. ४. १० ; कात्या० श्रौ० २ ५. १७ ; ४. २. १. आप० श्रौ १. १. १० ११ ; २. ६. १ ; ६. १०. १० ; ७. १२. ५ ; १९. १. मा० श्रौ० १. ६. १ ४२ ; ८. ३. २ ; शा० गृ० १ ८. १९ ; बृ० प० सं० ९. १०९.

२—(शा० श्रौतसूत्रे शा० गृह्यसूत्रे च ईळे अन्यत्र ईडे इतिपाठः) ऋ० सं० १. १. १ ; आर० सं० ३. ४ ; तै० सं० ४. ३. १३. ३ ; मै० सं० ४. १०. ५ ; १५५. १ ; का० सं० २. १४ ; गो० ब्रा० १. १. २९ ; आश्व० श्रौ० २. १. २६ ; शा० श्रौ० ६. ४. १ ; आश्व० गृ० ३ ५. ६ ; शा० गृ० ४. ५. ७ ; नि० ७. १५.

३—(मै० सं० अग्ना) ऋ० सं० ६. १६. १० ; २. १० ; वा० सं० ११. ४६ ; तै० सं० २. ५. ७. ३. ४ ; ८. १, २ ; ४. १. ४. ३ ; ५ १. ५. ८ ; (bis.) ; ५ ६. १ ; मै० सं० २. ७. ४ ; ७९. ८ ; ३. १. ६ ; ८. १ ; ४. १०. २ ; १४५. १ ; का० सं० १६. ४ ; १९. ५ ; २०. १४ ; २६. १ ; ऐ० ब्रा० ७. ६. २ ; कौ० ब्रा० १. ४ ; गो० ब्रा० १. १. २९ ; पं० वि० ब्रा० ११. २. ३ ; श० ब्रा० १. ४. १. ७, ८, २२ ; ३. ३ ; ६. ४. ४. ९ ; तै० ब्रा० ३. ५ २. १ ; आश्व० श्रौ० १. २. ७ ; ३. १२. १२ ; शा० श्रौ० १.४ . ८ ; ३. ५. २ ; ला० श्रौ० (comm.) ४. ५. १९ ; ६. १४ ; कात्या० श्रौ० २५. ११. ३३ ; आप० श्रौ० १७. ७. ४ ; १०. ७ ; मा० श्रौ० ६ १. १ ; सा० वि० ब्रा० २. ६. ९. १० ; ३ ७. २.

क्रियायां शब्दत्वसंशयभाष्यम्—यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति, स शब्दः ?।

क्रियायां शब्दत्वनिराकरणभाष्यम्-नेत्याह । क्रिया नाम सा ।

गुणे शब्दत्वसंशयभाष्यम्— यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति, स शब्दः ?।

गुणे शब्दत्वनिराकरणभाष्यम्—नेत्याह । गुणो नाम सः ।

आकृतौशब्दत्वसंशयभाष्यम्— यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं, स शब्दः ?।

जात्याकृत्योः शब्दत्वनिराकरणम्-नेत्याह । आकृति र्नाम सा ॥

शब्दस्वरूपजिज्ञासासिद्धिभाष्यम्-कस्तर्हि शब्दः ?।

शब्दस्वरूपनिरूपणभाष्यम्— येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः ॥ अथवा—प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते । तद्यथा-शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः, इति ध्वनिं कुर्वन्नेवमुच्यते । तस्माद् ध्वनिः शब्दः ॥

प्रयोजनजिज्ञासाभाष्यम्— कानि पुनः शब्दानुशासनस्य प्रयोजनानि ?।

प्रयोजनोद्देशवर्णनम्— रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ।

रक्षाप्रयोजनोपपादनभाष्यम्— रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीति ।

ऊहप्रयोजनोपपादनभाष्यम्— ऊहः[१] खल्वपि-न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् ।

१—'अग्नये त्वा जुष्टं निर्वपामि' इति प्रकृतावुपदिष्टस्य स्थाने सौरविकृतौ 'सूर्याय त्वा जुष्टं निर्वपामि' इति ऊहः क्रियते तत्र स्वरसंस्कारो व्याकरणाध्ययनमन्तरा नैव यथायथं संभवतः ।

आगमाज्ञापालनरूपप्रयोजनोपपादनभाष्यम्—

आगमः खल्वपि—'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति॥

लघुप्रयोजनोपपादनभाष्यम्—

लघ्वर्थं चाध्येयं व्याकरणम्। 'ब्राह्मणेनावश्यं शब्दा ज्ञेयाः' इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम्।

असंदेहप्रयोजननिरूपणभाष्यम्—

असंदेहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति—'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति। तस्यां सन्देहः—स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति—यदि पूर्वपदप्रकृतिस्वरत्वं[1] ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं[2] ततस्तत्पुरुष इति।

व्याकरणाध्ययनसाधकनिगमोद्देशकथनम्—

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि—तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उतत्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुण इति।

'तेऽसुराः' निगमनिरूपणम्—

तेऽसुराः—'तेऽसुरा[3] हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद्ब्राह्मणेन

१—बहुव्रीहौ प्रकृत्या पूर्वपदम्। ६। २। १॥

२—समासस्य ६। १।२२३॥

३—शब्दकौस्तुभे भट्टोजिदीक्षितः—[अयं पाठः कचिच्छाखायामन्वेषणीयः। माध्यन्दिनानां शतपथब्राह्मणे तु 'हेलवो हेलव इति वदत इति पठित्वा तस्माद् ब्राह्मणो न म्लेच्छेदिति पठ्यते' इति] शतपथब्राह्मणे त्वेवं पाठः—'तेऽसुरा आत्तवचसो हेऽलवो हेऽलव इति वदन्तः पराबभूवुः (३। २।

न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः'। (तेऽसुराः)

'दुष्टःशब्दः-' निगमनिरूपणम्—दुष्टः शब्दः—

"दुष्टः शब्दः[1] स्वरतो वर्णतो वा
मिथ्या प्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्"। इति।

दुष्टान् शब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्। (दुष्टः शब्दः)

'यदधीतम्-'निगमनिरूपणम्—यदधीतम्[2]—

'यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्?॥ तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्। (यदधीतम्)

'यस्तु प्रयुङ्क्ते' निगमनिरूपणम्—यस्तु प्रयुङ्क्ते—

'यस्तु प्रयुङ्क्ते कुशलो विशेषे।
शब्दान्यथावद् व्यवहारकाले॥
सोऽनन्तमाप्नोति जयं परत्र।
वाग्योगविद् दुष्यति चापशब्दैः'॥

दुष्यतिक्रियाकर्तृजिज्ञासाभाष्यम्-कः?।

दुष्यतिक्रियाकर्तृनिरूपणम्— वाग्योगविदेव।

१।२३)········तस्मान्न ब्राह्मणो म्लेच्छेदिति (३।२।१।२४) अत्र सायणः—'तेऽसुराः आत्तवचसो देवैः स्वीकृतवचसो हे अरयो हे अरय इत्युच्चारयितुमशक्ता हे अलवो हे अलव इति वदन्तः पराभूताः·················· तस्मान्न म्लेच्छेत् म्लेच्छो न भवेत्। काण्वशाखीयशतपथपाठस्तु 'हैलो हैल इति'। एवं च रेफस्य लत्वकरणं यकारस्य वत्वकरणं वाक्यद्वित्वकरणं च च्युतसंस्कृतत्वेन म्लेच्छनम्।

१—'दुष्टः शब्दः' इत्यस्य स्थाने 'मन्त्रो- हीनः' इति पाठः (ना॰ शि॰ १।५, पा॰ शि॰ श्लो॰ ५२)

२—निरुक्ते (१।१८ खण्डे) यदधीतमित्यस्य स्थाने यद्गृहीतमिति पाठः।

कारणजिज्ञासा—	कुत एतत् ?।
समाधानम्—	यो हि शब्दान् जानात्यपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः।
अधर्मभूयस्त्वप्राप्तिनिरूपणम्—	अथवा भूयानधर्मः प्राप्नोति।
कारणजिज्ञासा—	कुत एतत् ?।
कारणनिरूपणम्—	भूयांसोपशब्दाः, अल्पीयांसः शब्दा इति। एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। तद्यथा गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्यादयो बहवोपभ्रंशाः।
अवाग्योगविदःकर्तृत्वनिराकरणम्-	अथ योऽवाग्योगविद्, अज्ञानं तस्य शरणम्।
निराकरणानुपपत्तिः—	विषम उपन्यासः। नात्यन्तायाज्ञानं शरणं भवितुमर्हति। योह्यजानन् वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोपि मन्ये पतितः स्यात्।
सिद्धान्तनिरूपणम्—	एवं तर्हि— सोऽनन्तमाप्नोति जयं परत्र। वाग्योगविद् दुष्यति चापशब्दैः॥
सिद्धान्ते कर्तृजिज्ञासा—	कः ?।
कर्तृनिरूपणम्—	अवाग्योगविदेव।
वाग्योगविदो दोषाप्राप्तिकारणम्-	अथ यो वाग्योगविद्। विज्ञानं तस्य शरणम्।
निगमग्रन्थनामजिज्ञासा—	क पुनरिदं पठितम् ?।
ग्रन्थनामनिरूपणम्—	भ्राजा नाम श्लोकाः।
लौकिकवाक्यानांप्रामाण्यजिज्ञासा-	किं च भोः श्लोका अपि प्रमाणम् ?।
प्रामाण्ये बाधकजिज्ञासा—	किं चातः ?।
बाधकनिरूपणम्—	यदि श्लोका अपि प्रमाणम्। अयमपि श्लोकः प्रमाणं भवितुमर्हति— यदुदुम्बरवर्णानां घटीनां मण्डलं महत् पीतं न गमयेत्स्वर्गं किं तत् क्रतुगतं नयेत्। इति

बाधकाप्राप्तिः— प्रमत्तगीत एष तत्रभवतः । यस्त्वप्रमत्त-
गीतस्तत्प्रमाणम् । (यस्तु प्रयुङ्क्ते)

'अविद्वांसः' निगमनिरूपणम्— अविद्वांसः[1]—

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं
विदुः । कामं तेषु तु विप्रोष्य स्त्रीष्वि-
वायमहं वदेत् ॥
अभिवादे स्त्रीवन्माभूमेत्यध्येयं व्याकरणम्
(अविद्वांसः)

'विभक्तिं कुर्वन्ति' निगमनिरूपणम्-विभक्तिं कुर्वन्ति[2]—

याज्ञिकाः पठन्ति-'प्रयाजाः सविभक्तिकाः
कार्या इति । न चान्तरेण व्याकरणं
प्रयाजाः सविभक्तिकाः शक्याः कर्त्तुम् ।
(विभक्तिं कुर्वन्ति)

'यो वा इमाम्' निगमनिरूपणम्–यो वा इमाम्—

'यो वा इमां पदशः स्वरशोऽक्षरशश्च
वाचं विदधाति स[3] आर्त्विजीनो भवति ।
आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम्
(यो वा इमाम्)

'चत्वारि—' निगमनिरूपणम्— चत्वारि—

'चत्वारि[4] शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य ।

१—नामधेयस्य ये केचिदभिवादं न जानते । तान्प्राज्ञोऽयमहं ब्रूयात् स्त्रियः सर्वास्तथैव च (मनु० २. १२३.)

२—प्रयाजानां विभक्तीः कुर्यात……कस्मात् ? सविभक्तयः प्रयाजा भवन्तीति । (का० सं० ९. १. मै० सं० १. ७. ३. ४)

३—वर्णशोऽक्षरशो ज्ञानाद् विभक्तिपदशोपि च (वाज० प्रा० ८. २७.)

४—निरुक्ते त्वेवमुपलभ्यते–चत्वारि शृङ्गेति, वेदा वा एत उक्ताः । त्रयो अस्य पादा इति, सवनानि त्रीणि । द्वे शीर्षे प्रायणीयोदयनीये । सप्त हस्तासः, सप्त च्छन्दांसि । त्रिधा बद्ध, त्रेधा बद्धो मन्त्रब्राह्मणकल्पैः । वृषभो रोरवीति, रोरवणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिर्यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिःस्तुवन्ति महोदेव इत्येष हि महान् देवो यद्यज्ञो मर्त्यां आविवेशेत्येष हि मनुष्यानाविशति यजनाय (१३. ७. १.) ।

त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्याँ आविवेश'[1] ॥ इति ॥

चत्वारि शृङ्गाणि पदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाःत्रयः काला भूतभविष्यद्वर्त्तमानाः । द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च ॥ सप्त हस्तासो अस्य सप्तविभक्तयः ॥ त्रिधा बद्धः त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति[2] ॥ वृषभो वर्षणात् ॥ रोरवीति शब्दं करोति ॥

शब्दार्थकत्वे कारणजिज्ञासा— कुत एतत् ? ।

कारणनिरूपणम्— रौतिः शब्दकर्मा ।

महो देवो मर्त्यां आविवेशेति महान् देवः शब्दः ॥

मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश ॥

महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् ॥

'चत्वारि' निगमान्तरम्— अपर आह—

'चत्वारि[3] वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।

१—ऋ० सं० ४ । ५८ । ३ ।

२—तथाचोक्तं वाजसनेयिप्रातिशाख्ये कात्यायनेन–'सवनक्रमेणोरः कण्ठभ्रूमध्यानि' (१ ; ३०) तं स्पष्टीचकार पाणिनीयशिक्षा–'मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् । प्रातः सवनयोगं तं छन्दोगायत्रमाश्रितम् ॥ ७ ॥ कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जगतानुगम्' ॥ ८ ॥ इति ।

३—निरुक्ते त्वेवं लभ्यते–चत्वारि वाचः परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मेधाविनो गुहायां त्रीणि निहितानि नार्थं वेदयन्ते । गुहा गूहतेः । तुरीयं त्वरतेः । कतमानि तानि चत्वारि पदानि ? ओंकारो महाव्याहृतयश्चेत्यार्षम् । नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः । मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिकाः । ऋचो यजूंषि सामानि चतुर्थी व्यावहारि-

गुहा त्रीणि निहिता नेङ्गयन्ति,
तुरीयं वाचो मनुष्या वदन्ति[१] ॥

'चत्वारि वाक्परिमिता पदानि'। चत्वारि पदजातानि नामाख्यातोपसर्ग निपाताश्च।
'तानि विदुर्ब्राह्मणा ये मनीषिणः'। मनस ईषिणो मनीषिणः।
'गुहा त्रीणि निहिता नेङ्गयन्ति'। गुहायां त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते न निमिषयन्तीत्यर्थः।
'तुरीयं वाचो मनुष्या वदन्ति'। तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्त्तते चतुर्थमित्यर्थः। (चत्वारि)

'उतत्वः'निगमनिरूपणम्—

उतत्वः—

'उतत्वः पश्यन्न ददर्शवाच—
मुतत्वः श्रुण्वन्न श्रृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्त्रे
जायेव पत्य उशती सुवासाः[२] ॥'

'उतत्वः' अपि, खल्वेकः पश्यन्नपि न पश्यति वाचम्। अपि,खल्वेकः श्रृण्वन्नपि न श्रृणोत्येनामिति। अविद्वांसमाहार्थम्। 'उतोत्वस्मै तन्वं विसस्त्रे' तनुं विवृणुते। 'जायेव पत्य उशती सुवासाः। तद्यथा

वीति नैरुक्ताः। सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्यावहारिकीत्येके ?॥

पशुषु तूणवेषु मृगेष्वात्मनि चेत्यात्मप्रवादाः अथापि ब्राह्मणं भवति या वै वाक् सृष्टा चतुर्द्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयं या पृथिव्यां साग्नौ सा रथन्तरे। यान्तरिक्षे सा वायौ सा वामदेव्ये। या दिविसादित्ये सा बृहति सा स्तनयित्नौ॥ अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेस्वदधुस्तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणामिति॥

१—(ऋ० सं० १ । १ । १६४ । ४५ । गो० ब्रा० २. १६.)

२—(ऋ० सं० १० । ७१ । ४)

जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते, एवं वाग् वाग्विदे स्वात्मानं विवृणुते,। वाङ्नो विवृणुयादात्मानमित्यध्येयं व्याकरणम्। (उतत्वः)

'सक्तुमिव-' निगमनिर्देश : सक्तुमिव—

'सक्तुमिव तितउना पुनन्तो।
यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते।
भद्रैषां लक्ष्मी र्निहिताधिवाचि'[1] ॥

सक्तुः[2]—सचते र्दुर्धावो भवति, कसतेर्वा विपरीताद्विकसितो भवति। तितउ-परिपवनं भवति—(ततवद्वा तुन्नवद्वा) धीरा ध्यानवन्तः (मनसा प्रज्ञानेन। 'वाचमक्रत' वाचमकृषत।)

'अत्रा सखायः सख्यानि जानते।

'अत्र' पदार्थजिज्ञासा— (अत्र सखायः सन्तः सख्यानि जानते।
अत्रपदार्थप्रदर्शनम्— क?।
य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः।
सख्यज्ञानकर्तृजिज्ञासा— के पुनस्ते?।
सख्यकर्तारः— वैयाकरणाः।
कारणजिज्ञासा— कुत एतत्?।)
कारणप्रदर्शनम्— 'भद्रैषां लक्ष्मीर्निहिताधिवाचि'।
एषां वाचि भद्रा लक्ष्मीर्निहिता भवति॥

१—(ऋ० सं० १०। ७१। २)

२—निरुक्ते त्वेवं पाठः—सक्तुमिव परिपवनेन पुनन्तः। सक्तुः सचतेर्दुर्धावो भवति। कसतेर्वा स्याद्विपरीतस्य विकसितो भवति। 'यत्र धीरा मनसा वाचमकृषत' प्रज्ञानम्। धीराः प्रज्ञानवन्तो ध्यानवन्तः। तत्र सखायः सख्यानि संजानते भद्रैषां लक्ष्मीर्निहिताधि वाचि इति। भद्रं भगेन व्याख्यातम्। भजनीयं भूतानामभिद्रवणीयं भवद्रमयतीति वा भाजनवद्वा। लक्ष्मीर्लाभाद्वा लक्षणाद्वा (लप्स्यनाद्वा) लाञ्छनाद्वा, लषतेर्वा स्यात् प्रेप्साकर्मणो लग्यतेर्वास्यादाश्लेषकर्मणो लज्जतेर्वास्यादश्लाघाकर्मणः। (४. ९. १.)

लक्ष्मीर्लक्षणाद् भासनात्परिवृढा भवति।
(सक्तुमिव)

'सारस्वतीम्' निगमनिदर्शनम्– सारस्वतीम्—

याज्ञिकाः पठन्ति—" आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्" इति।

प्रायश्चित्तीया माभूमेत्यध्येयं व्याकरणम्।
(सारस्वतीम्)

'दशम्यां पुत्रस्य' निगमनिदर्शनम्– दशम्यां पुत्रस्य—

याज्ञिकाः पठन्ति—" दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम् इति।

न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। (दशम्यां पुत्रस्य)

'सुदेवोअसि' निगमनिदर्शनम्– सुदेवो असि—

'सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव'[1]।

'सुदेवो असि वरुण' सत्यदेवोऽसि। 'यस्य ते सप्त सिन्धवः' सप्त विभक्तयः। 'अनुक्षरन्ति काकुदम्'। काकुदं तालु। काकुर्जिह्वा, सास्मिन्नुद्यत इति काकुदम्। 'सूर्म्यं सुषिरामिव'। तद्यथा—शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः सप्त विभक्तयस्तात्ववनुक्षरन्ति। तेनासि सत्यदेवः। सत्यदेवाः स्यामेत्यध्येयं व्याकरणम्।
(सुदेवो असि)

1—(ऋ० सं० ८। ६९। १२)

व्याकरणाध्ययनप्रयोजनान्वाख्यानकारणजिज्ञासा— किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते, न पुनरन्यदपि किंचित् 'ओं' इत्युक्त्वा वृत्तान्तशः शमित्येवमादीन् शब्दान् पठन्ति ?।

प्रयोजनान्वाख्यानकारणानिरूपणम्— पुराकल्प एतदासीत्–संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते । तेभ्यस्तत्तत्स्थान[1]करणना[2]दानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते । तदद्यत्वे न तथा । वेदमधीत्य त्वरिता वक्तारो भवन्ति—

'वेदान्नो वैदिकाः शब्दाः—
सिद्धा लोकाच्च लौकिकाः ।
अनर्थकं व्याकरणम्' इति ॥ तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यःसुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे—इमानि प्रयोजनान्यध्येयं व्याकरणम्—इति ॥

उपसंहारः— उक्तः शब्दः । स्वरूपमप्युक्तम् । प्रयोजनान्यप्युक्तानि ।

अवश्यकर्तव्ये शब्दानुशासने अन्यतरोपदेशे उभयोपदेशे वा कर्तव्यता— शब्दानुशासनमिदानीं कर्त्तव्यम् । तत्कथं कर्तव्यम् । किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेशः, आहोस्विदुभयोपदेश इति ।

अन्यतरोपदेशस्यैव कर्तव्यता— अन्यतरोपदेशेन कृतं स्यात् । तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते । 'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यते

---

१. स्वराणां यत्रोपसंहारस्तत् स्थाम् तै० प्रा० अ० २ सू० ३१ ।
यदुपसंहरति तत् करणम् „ „ „ „ ३२ ।
अन्येषां तु यत्र स्पर्शनं तत् स्थानम् „ „ „ „ ३३ ।
येन स्पर्शयति तत् करणम् „ „ „ „ ३४ ।
२. नादोनुप्रदानंस्वरघोषवत्सु । „ अ० २ सू० ८ ।
अघोषेषु श्वासः „ „ „ „ १० ।

एतद्–'अतोऽन्येऽभक्ष्या' इति ।
अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः । तद्यथा 'अभक्ष्यो ग्रामकुक्कुटः अभक्ष्यो ग्रामसूकरः' इत्युक्ते गम्यत एतद्–'अरण्यो भक्ष्य' इति ।

दार्ष्टान्तिके योजना—

एवमिहापि–यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद् 'गाव्यादयोऽपशब्दाः' इति । अथाप्यपशब्दोपदेशः क्रियते, गाव्यादिषूपदिष्टेषु गम्यत एतद्–गौरित्येष शब्दः' इति ।

अन्यतरोपदेशे किं श्रेयः ?

किं पुनरत्र ज्यायः ? ।

शब्दोपदेशकर्तव्यता—

लघुत्वाच्छब्दोपदेशः ।
लघीयाञ्छब्दोपदेशः । गरीयानपशब्दोपदेशः । एकैकस्य शब्दस्य बहवो पभ्रंशाः ।

प्रतिज्ञातासिद्धिरपि—

इष्टान्वाख्यानं खल्वपि भवति ॥

शब्दोपदेशरीतिजिज्ञासायां— किं प्रतिपदपाठःकरणीयः ?

अथैतस्मिञ् शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्त्तव्यः। गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः ? ॥

प्रतिपदपाठस्यानभ्युपायत्वम्—

नेत्याह। अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते—'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम।' बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो, न चान्तं जगाम, किं पुनरद्यत्वे। यः सर्वथा चिरञ्जीवति वर्षशतं जीवति।

चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति—आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति, तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं

स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः ।

शब्दप्रतिपत्तिरीतिजिज्ञासा— कथं तर्हीमे शब्दाः प्रतिपत्तव्याः ? ।

शब्दप्रतिपत्तिरीतिः— किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम् । येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् ।

सामान्यविशेषलक्षणजिज्ञासा —किं पुनस्तत् ? ।

सामान्यविशेषलक्षणनिरूपणम्—उत्सर्गापवादौ । कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः ।

लक्षणे सामान्यविशेषत्वजिज्ञासा—कथंजातीयकः पुनरुत्सर्गः कर्तव्यः, कथंजातीयकोऽपवादः ? ।

लक्षणे सामान्यत्वनिदर्शनम्— सामान्येनोत्सर्गः कर्तव्यः । तद्यथा—'कर्मण्यण्'[1] ।

लक्षणे विशेषत्वनिदर्शनम्— तस्य विशेषेणापवादः । तद्यथा-'आतोनुपसर्गे कः'[2] ।

व्यक्त्याकृत्योः पदार्थत्वजिज्ञासा—किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम् ? ।

उभयोः पदार्थत्वम्— उभयमित्याह ।

कारणजिज्ञासा— कथं ज्ञायते ? ।

कारणनिरूपणम्— उभयथा ह्याचार्येण सूत्राणि पठितानि—आकृतिं पदार्थं मत्वा—'जात्याख्यायामेकस्मिन्वहुबचनमन्यतरस्याम्'[3] इत्युच्यते ।

द्रव्यं पदार्थं मत्वा 'सरूपाणाम्[4]—'इत्येकशेष आरभ्यते ।

शब्दे नित्यत्वकार्यत्वजिज्ञासा— किं पुनर्नित्यः शब्दः, आहोस्वित्कार्यः ? ।

शब्दे नित्यत्वनिर्णयः— संग्रह एतत्प्राधान्येन परीक्षितम्—नित्यो वा स्यात्कार्यो वेति । तत्रोक्ता दोषाः ॥ प्रयोजनान्यप्युक्तानि । तत्र त्वेष निर्णयः—

१—(३।२।१) २—(३।२।३)
३—(१।२।५८) ४—(१।२।६४)

यद्येव नित्यः, अथापि कार्यः, उभयथापि लक्षणं प्रवर्त्यमिति ।

शब्दस्य नित्यत्वे पाणिनिप्रयासानर्थक्यम्— कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्—

पाणिनिप्रयाससंवयर्थ्यसाधकवार्तिकम्— * सिद्धे शब्दार्थ सम्बन्धे ? *

वार्तिकव्याख्या— सिद्धे शब्दे अर्थे संबन्धेचेति ।

सिद्धपदार्थजिज्ञासा— अथ सिद्धशब्दस्य कः पदार्थः ? ।

सिद्धपदार्थनिरूपणम्— नित्यपर्यायवाची सिद्धशब्दः ।

कारणजिज्ञासा— कथं ज्ञायते ? ।

कारणनिरूपणम्— यत्कूटस्थेष्वविचालिषु भावेषु वर्तते । तद्यथा—सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति ।

सिद्धपदे नित्यपर्यायतानिराकरणम्— ननु च भोः कार्येष्वपि वर्तते । तद्यथा—सिद्ध ओदनः, सिद्धः सूपः, सिद्धा यवागूरिति । यावता कार्येष्वपि वर्तते, तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्द इति ।

व्याडिविरचितसंग्रहग्रन्थ इव-नित्यपर्यायस्यैवात्र ग्रहणम् — संग्रहे तावत्कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति । इहापि तदेव ।

नित्यपर्यायग्रहणे युक्त्यन्तरम्— 'अथवा सन्त्येकपदान्यप्यवधारणानि । तद्यथा-अब्भक्षो वायुभक्ष इति-अप एव भक्षयति, वायुमेव भक्षयतीति गम्यते । एवमिहापि सिद्ध एव, न साध्य इति ।

नित्यपर्यायग्रहणे युक्त्यन्तरम्— अथवा पूर्वपदलोपोत्र द्रष्टव्यः—अत्यन्तसिद्धः, सिद्ध इति । तद्यथा—देवदत्तो दत्तः, सत्यभामा भामेति ।

नित्यपर्यायग्रहणे युक्त्यन्तरम्— अथवा "व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्" इति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः ।

सिद्धपदोपादानेप्रयोजनजिज्ञासा— किं पुनरनेन वर्ण्येन । किं न महता

	कण्ठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमानेऽसंदेहः स्यात् ?।
प्रयोजननिरूपणम्—	मङ्गलार्थम्।
प्रयोजनवाक्यव्याख्या—	माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति।
नित्यपदोपादाने निश्चयाभावः-	अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते।
जिज्ञासा—	किं तर्हि ?।
समाधानम्—	आभीक्ष्ण्येऽपि वर्तते। तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति।
शिष्टव्याख्यानस्योभयत्रापि समानतैव—	यावताभीक्ष्ण्येऽपि वर्त्तते तत्राप्यनेनैवार्थः स्यात्—'व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्' इति।
सिद्धपदोपादाने मङ्गलार्थतापीति-कार्यद्वयम्—	पश्यति त्वाचार्यो मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति, शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति। अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः।
निदर्शितविग्रहसाधकपदार्थजिज्ञासा—	अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते—'सिद्धे शब्देऽर्थे सम्बन्धे चेति।
नित्यतासाधकपदार्थनिरूपणम्—	आकृतिमित्याह।
आकृतेर्नित्यताहेतुजिज्ञासा—	कुत एतत् ?।
आकृतेर्नित्यताहेतुनिरूपणम्—	आकृति र्हि नित्या, द्रव्यमनित्यम्।
द्रव्यपदार्थे विग्रहजिज्ञासा—	अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः ?।
द्रव्यपदार्थे विग्रहकथनम्—	सिद्धे शब्दे अर्थे सम्बन्धे चेति।
तत्रहेतुनिरूपणम्—	नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः।
द्रव्यपदार्थस्यैव नित्यता—	अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः—सिद्धे शब्दे अर्थे सम्बन्धे चेति। द्रव्यं हि नित्यमाकृतिरनित्या।

जिज्ञासा—	कथं ज्ञायते ?।
हेतुनिरूपणम् —	एवं हि दृश्यते लोके मृत्कयाचिदाकृत्या युक्ता पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते। पुनरावृत्तः सुवर्णपिण्डः। पुनरपरयाकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः। आकृतिरन्या चान्या च भवति द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवावशिष्यते।
आकृतिपदार्थस्यैव नित्यत्वम्—	आकृतावपि पदार्थ एष विग्रहो न्याय्यः—सिद्धे शब्दे अर्थे सम्बन्धे चेति।
प्रागुक्तिविरोधः—	ननु चोक्तं—आकृतिरनित्या—इति।
विरोधपरिहारः—	नैतदस्ति। नित्याऽऽकृतिः॥
कारणजिज्ञासा—	कथम् ?॥
कारणनिरूपणम्—	न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति। द्रव्यान्तरस्थातूपलभ्यते॥
वास्तविकनित्यलक्षणनिरूपणम्—	अथवा नेदमेव नित्यलक्षणम्—ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृध्द्यव्यययोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिँस्तत्त्वं न विहन्यते।
तत्त्वपदार्थजिज्ञासा—	किं पुनस्तत्त्वम् ?॥
तत्त्वपदार्थनिरूपणम्—	तद्भावस्तत्त्वम्।
आकृतौ नित्यत्वसाधनम्—	आकृतावपि तत्त्वं न विहन्यते॥
नित्यत्वानित्यत्वविचारवैयर्थ्यम्—	अथवा किं न एतेन—इदं नित्यमिदमनित्यमिति। यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते—सिद्धे शब्देऽर्थे संबन्धे चेति॥
शब्दार्थसंबन्धानां नित्यत्वज्ञान-हेतुजिज्ञासा—	कथं पुनर्ज्ञायते—सिद्धः शब्दोऽर्थः संबन्धश्चेति।
हेतुज्ञापकवार्त्तिकम्—	* लोकतः *

वार्तिकव्याख्यानम् — यल्लोकेऽर्थमर्थमुपादाय शब्दान् प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति । ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते । तद्यथा—घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह—'कुरु घटं कार्यमनेन करिष्यामीति न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह—'कुरु शब्दान् प्रयोक्ष्ये' इति । तावत्येवार्थमुपादाय शब्दान्प्रयुञ्जते ॥

शास्त्रप्रयोजनजिज्ञासा— यदि तर्हि लोक एषु प्रमाणं, किं शास्त्रेण क्रियते ? ॥

सिद्धान्तसमाधानवार्त्तिकम्— * लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः *

वार्तिकव्याख्यानम्— लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते ॥

धर्मनियमपदार्थजिज्ञासा— किमिदं धर्मनियम इति ? ।

धर्मनियमपदविग्रहकथनम्— धर्माय नियमो धर्मनियमः, धर्मार्थो वा नियमो धर्मनियमः । धर्मप्रयोजनो वा नियमो धर्मनियमः ॥

धर्मनियमाय शास्त्रप्रवृत्तिदृष्टान्तः वार्तिकशेषः— * यथा लौकिकवैदिकेषु *

वार्तिकशेषव्याख्यायां दैशवैयर्थ्यम्— तद्धितनि-प्रियतद्धिता दाक्षिणात्याः—यथा लोके वेदे चेति प्रयोक्तव्ये 'यथा लौकिकवैदिकेषु' इति प्रयुञ्जते ।

तद्धितप्रयोगसाफल्यम्— अथवा युक्त एवात्र तद्धितार्थः । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु ॥

धर्मनियमे लौकिकदृष्टान्तः— लोके तावद् 'अभक्ष्यो ग्रामकुक्कुटः, अभक्ष्यो ग्रामसूकर' इत्युच्यते । भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते । शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् तत्र नियमः क्रियते इदं भक्ष्यमिदमभक्ष्यमिति । तथा—खेदात्स्त्रीषु प्रवृत्तिर्भवति ।

समानश्च खेदविगमो गम्यायां चागम्यायां च । तत्र नियमः क्रियते-इयं गम्येयमगम्येति ॥

धर्मनियमे वैदिकदृष्टान्तः-- वेदे खल्वपि-'पयोव्रतो ब्राह्मणो यवागूव्रतोराजन्य आमिक्षाव्रतो वैश्यः" इत्युच्यते । व्रतं च नामाभ्यवहारार्थमुपादीयते । शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते ॥

वैदिकोदाहरणान्तरम्— तथा— 'बैल्वः खादिरो वा यूपः स्यात्'[1] इत्युच्यते । यूपश्च नाम पश्वनुबन्धार्थमुपादीयते । शक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्धुम् । तत्र नियमः क्रियते ॥

वैदिकोदाहरणान्तरम्— तथा—'अग्नौ कपालान्यधिश्रित्याभिमन्त्रयते-'भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वम्' इति । अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि संतापयति । तत्र च नियमः क्रियते —एवं क्रियमाणमभ्युदयकारि भवतीति ॥

लौकिकवैदिकधर्मनियमस्य प्रकृतेऽपि संगतिः— एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते-- शब्देनैवार्थोऽभिधेयो नापशब्देनेति ॥ एवं क्रियमाणमभ्युदयकारि भवतीति ॥

अप्रयुक्तान्वाख्यानाक्षेपवार्तिकम्- ※ अस्त्यप्रयुक्तः ※

सन्ति वै शब्दा अप्रयुक्ताः । तद्यथा— ऊष, तेर, चक्र, पेचेति ॥

अप्रयुक्तान्वाख्याने दूषणजिज्ञासा-किमतो यत्सन्त्यप्रयुक्ताः ? ॥

अप्रयुक्तान्वाख्याने दूषणनिरूपणम्— प्रयोगाद्धि भवाञ् शब्दानां साधुत्वमध्यवस्यति । य इदानीमप्रयुक्ता नामी साधवः स्युः ॥

1—(आप० श्रौ० १८ । १ । ८ ॥)

विप्रतिषिद्धोक्तिसंभावना—	इदं तावद्विप्रतिषिद्धम्—यदुच्यते—'सन्ति वै शब्दा अप्रयुक्ता' इति । यदि सन्ति, नाप्रयुक्ताः, अथाप्रयुक्ता न सन्ति, सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम् । प्रयुञ्जान एव खलु भवानाह—सन्ति शब्दा अप्रयुक्ता इति ॥
उपहासः—	कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् ? ॥
विप्रतिषिद्धत्वनिराकरणम्—	नैतद्विप्रतिषिद्धम् । सन्तीति तावद्ब्रूमः यदेताञ्शास्त्रविदः शास्त्रेणानुविदधते ॥ अप्रयुक्ता इति ब्रूमः । यल्लोकेऽप्रयुक्ता इति ॥
उपहासनिराकरणम्—	यदप्युच्यते—कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति ।
विरुद्धोक्तिनिराकरणम्—	नब्रूमोऽस्माभिरप्रयुक्ता इति ।
आशयजिज्ञासा—	किं तर्हि ? ॥
आशयकथनम्—	लोकेऽप्रयुक्ता इति ॥
विप्रतिषिद्धत्वसाधनम्—	ननु च भवानप्यभ्यन्तरो लोके ॥
विप्रतिषिद्धत्वबाधनम्—	अभ्यन्तरोऽहं लोके, नत्वहं लोकः ॥
शास्त्रान्वाख्यानस्यावश्यकतावार्तिकम्—	* अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात् *
वार्तिकव्याख्यानम्—	'अस्त्यप्रयुक्तः' इति चेत् । तन्न ।
हेतुजिज्ञासा—	किं कारणम् ? ।
हेतुनिरूपणम्—	अर्थे शब्दप्रयोगात् । अर्थे शब्दाः प्रयुज्यन्ते । सन्ति चैषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते ॥
अप्रयोगहेतुवार्तिकम्—	* अप्रयोगः प्रयोगान्यत्वात् *
वार्तिकव्याख्यानम्—	'अप्रयोगः' खल्वप्येषां शब्दानां न्याय्यः ।
हेतुजिज्ञासा—	कुतः ? ।
हेतुनिरूपणम्—	'प्रयोगान्यत्वात्' । यदेषां शब्दानामर्थेऽन्याञ्छब्दान् प्रयुञ्जते । तद्यथा—ऊषे

त्यस्य शब्दस्यार्थे-'क्व यूयमुषिताः', तेरेत्यस्यार्थे-'क्व यूयं तीर्णाः', चक्रेत्यस्यार्थे-'क्व यूयं कृतवन्तः । पेचेत्यस्यार्थे-'क्व यूयं पक्वन्त' इति ॥

प्रथमं सिद्धान्तिसमाधानवार्तिकम्-* अप्रयुक्ते दीर्घसत्रवत् *

वार्तिकव्याख्यानम्— यद्यप्यप्रयुक्ताः अवश्यं दीर्घसत्त्रवल्लक्षणेनानुविधेयाः । तद्यथा दीर्घसत्त्राणि वार्षशतिकानि वार्षसहस्त्रिकाणि च । न चाद्यत्वे कश्चिदप्याहरति । केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते ।

द्वितीयंसिद्धान्तिसमाधानवार्तिकम्-* सर्वे देशान्तरे *

वार्तिकव्याख्यानम्— सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते ॥

समाधानबाधकभाष्यम्— न चैवोपलभ्यन्ते ॥

समाधानसाधकभाष्यम्— उपलब्धौ यत्नः क्रियताम् ॥

बलाशक्यबोधकं सिद्धान्तिभाष्यम्— महान् हि शब्दस्य प्रयोगविषयः । सप्त द्वीपा वसुमती, त्रयो लोकाः चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्त्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः । वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य 'सन्त्यप्रयुक्ता' इति वचनं केवलं साहसमात्रमेव ॥

एतस्मिंश्चाति महति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते, तद्यथा—शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, (विकार एनमार्या भाषन्ते शव इति) हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमि-

मेवत्वार्याः प्रयुञ्जते दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु ॥

अप्रयुक्तत्वकथनस्य मिथ्यात्वसाधनम्

ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दाः एतेषामपि प्रयोगो दृश्यते ॥

जिज्ञासाभाष्यम्—

क ? ।

प्रयोगाधारनिरूपणम्—

वेदे । तद्यथा 'सप्तास्ये रेवतीरेवदूष'[1] 'यद्वो रेवती रेवत्यां तमूष', 'यन्मे नरः श्रुत्यं ब्रह्म चक्र'[2] 'यत्रा नश्चक्रा जरसं तनूनाम्'[3] इति ॥

शब्दप्रयोगस्य धर्मजनकतासाधनाधिकरणम् आक्षेपभाष्यम्

किं पुनः शब्दस्य ज्ञाने धर्मः, आहोस्वित् प्रयोगे ? ॥

विशेषजिज्ञासा—

कश्चात्र विशेषः ? ॥

विशेषनिरूपणवार्तिकम्—

* ज्ञाने धर्म इति चेत्तथाऽधर्मः ॥ *

व्याख्याभाष्यम्—

ज्ञाने धर्म इति चेत्तथाऽधर्मोऽपि प्राप्नोति । यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति । यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः ॥

अधर्माधिक्यसंभवभाष्यम्—

अथवा भूयानधर्मः प्राप्नोति ? ।

साधकभाष्यम्—

भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः । एकैकस्य शब्दस्य वहवोऽपभ्रंशाः । तद्यथा गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः ॥

ज्ञाने धर्मवेदाविरोधवार्तिकम्

* आचारे नियमः *

आचारे पुनर्ऋषिर्नियमं वेदयते—'तेऽसुरा हेलयो हेलय इति कुर्वन्तः परा बभूवुः इति ॥

प्रयोगे धर्माङ्गीकारभाष्यम्—

अस्तु तर्हि प्रयोगे ॥

प्रयोगे धर्माङ्गीकारेदूषण वार्तिकम्—

* प्रयोगे सर्वलोकस्य *

व्याख्याभाष्यम्—

यदि प्रयोगे धर्मः, सर्वोलोकोऽभ्युदयेन युज्येत ।

१.—(ऋ० सं० ४ । ५१ । ४ ॥)   २.—(का० सं० ९ । १८ ॥)
३.—(वाज० सं० २५ । २२ ॥ ऋ० सं० १ । ८९ । ९ ॥)

मात्सर्योपालम्भभाष्यम्— कश्चेदानीं भवतो मत्सरो, यदि सर्वो लोकोऽभ्युदयेन युज्येत ? ॥

प्रयत्नवैयर्थ्यापत्तिदूषणम्— न खलुकश्चिन्मत्सरः । प्रयत्नानर्थक्यं तु भवति । बलवता च नाम प्रयत्नेन भवितव्यम् । न च प्रयत्नः फलाद्व्यतिरेच्यः ।

फले प्रयत्नसाध्यताभाष्यम्— ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान् प्रयोक्ष्यन्ते, त एव साधीयोऽभ्युदयेन योक्ष्यन्ते ॥

व्यतिरेकोपलब्धिभाष्यम्— व्यतिरेकोपि वै लक्ष्यते । दृश्यते हि कृत प्रयत्नाश्चाप्रवीणाः, अकृतप्रयत्नाश्च प्रवीणाः । तत्र फलव्यतिरेकोऽपि स्यात् ॥

सिद्धान्तसमाधानभाष्यम्— एवं तर्हि—नापि ज्ञान एव धर्मो नापि प्रयोग एव ॥

जिज्ञासाभाष्यम्— किं तर्हि ? ।

सिद्धान्तवार्तिकम्— * शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन *

व्याख्याभाष्यम्— शास्त्रपूर्वकं यः शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते । 'तत्तुल्यं वेदशब्देन' । वेदशब्दा अप्येवमभिवदन्ति, 'योऽग्निष्टोमेन यजते य उ चैनमेवं वेद' 'योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद' ॥

व्याख्यान्तरभाष्यम्— अपर आह-'तत्तुल्यं वेदशब्देने' ति । यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्ति । एवं यः शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति ॥

शब्दज्ञानस्यैव धर्मसाधकत्वाङ्गीकारः— अथवा पुनरस्तु—ज्ञान एव धर्म इति ॥

प्रागुक्तदोषस्मारकभाष्यम्— ननु चोक्तं—ज्ञाने धर्म इति चेत्तथाधर्म इति ।

दोषनिवारणभाष्यम्— नैष दोषः, शब्दप्रमाणका वयम् । यच्छब्द आह तदस्माकं प्रमाणम् शब्दश्च

शब्दज्ञाने धर्ममाह नापशब्दज्ञानेऽधर्मम्॥ यच्च पुनरशिष्टाप्रतिषिद्धं, नैव तद्दोषाय भवति नाभ्युदयाय । तद्यथा हिक्कित हसित कण्डूयितानि नैव दोषाय भवन्ति नाभ्युदयाय ॥

अपशब्दज्ञानस्याप्यावश्यकताभाष्यम्--

अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। यो ह्यपशब्दाञ्जानाति शब्दानप्यसौ जानाति । तदेवं 'ज्ञाने धर्मः' इति ब्रुवतोऽर्थादापन्नं भवति—'अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः' इति ॥

अधर्मस्य निवृत्तिभाष्यम्--

अथवा कूपखानकवदेतद् भविष्यति । तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति । सोऽप्सु संजातासु तत एव तं गुणमासादयति येन च स दोषो निर्हण्यते । भूयसा चाभ्युदयेन योगो भवति ॥

दृष्टान्तोपलब्धस्य प्रकृते योजनाभाष्यम्--

एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन च स दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति ॥

आचारनियमविरोधस्मारणम्-- यदप्युच्यते—'आचारे नियमः' इति ।

आचारनियमविरोधपरिहारभाष्यम्--

याज्ञे कर्मणि स नियमोऽन्यत्रानियमः । एवं हि श्रूयते—'यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः'। ते तत्रभवन्तो यद्वा न स्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे पुनः कर्मणि नापभाषन्ते ॥ तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितम् । ततस्ते पराभूताः ॥

व्याकरणपदार्थनिर्णयाधिकरणम्-आक्षेपभाष्यम्—

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः ?॥

सूत्रलक्षणस्य व्याकरणत्वाङ्गीकारः- सूत्रम् ॥

सूत्रस्य व्याकरणत्वे दूषणवार्तिकम्- * सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः *

व्याख्याभाष्यम्— सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते— 'व्याकरणस्य सूत्रम्' इति ।

अनुपपत्तिप्रकाशनभाष्यम्— किं हि तदन्यत्सूत्राद् व्याकरणम् ?, यस्यादः सूत्रं स्यात् ।

लक्षणस्य व्याकरणत्वे दूषणान्तरवार्तिकम् । * शब्दाप्रतिपत्तिः *

व्याख्याभाष्यम्— शब्दानां चाप्रतिपत्तिः प्राप्नोति—'व्याकरणाच्छब्दान् प्रतिपद्यामहे' इति । नहि सूत्रत एव शब्दान् प्रतिपद्यन्ते ।

शब्दप्रतिपत्तिजिज्ञासाभाष्यम्— किं तर्हि ? ।

शब्दप्रतिपत्तिसाधननिरूपणभाष्यम्— व्याख्यानतश्च ।

विभक्तपदसूत्रस्यैवव्याख्यानत्वबोधकभाष्यम्— ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति ॥

पदविभागस्यैव व्याख्यानत्वनिराकरणम्— न केवलानि चर्चापदानि व्याख्यानम्— 'वृद्धिः, आत्, ऐज्' इति ।

व्याख्यानपदार्थजिज्ञासाभाष्यम्— किं तर्हि ? ॥

व्याख्यानपदार्थनिरूपणभाष्यम्— उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति ॥

लक्ष्यस्यैव व्याकरणत्वाङ्गीकारभाष्यम्— एवं तर्हि शब्दः ।

लक्ष्यस्य व्याकरणत्वे दूषणवार्तिकम्— * शब्दे ल्युडर्थः *

व्याख्यानभाष्यम्— यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते- व्याक्रियन्ते शब्दा अनेनेति व्याकरणम् ।

ल्युडर्थकरणतानुपपत्तिसाधकभाष्यम्— नहि शब्देन किंचिद् व्याक्रियते ॥

उपपत्तिसाधककरणजिज्ञासा— केन तर्हि ? ॥

उपपत्तिसाधककरणनिरूपणम्— सूत्रेण ॥

लक्ष्यस्य व्याकरणत्वे दूषणान्तरवार्तिकम्— * भवे च तद्धितः *

व्याख्याभाष्यम्— भवे च तद्धितो नोपपद्यते[1]–'व्याकरणे भवो योगो वैयाकरणः'–इति ॥

भवार्थानुपपत्तिसाधकभाष्यम्— नहि शब्दे भवो योगः ।

भवाधिकरणार्थजिज्ञासानिरूपणम्-क तर्हि ? ।

भवाधिकरणार्थनिरूपणम्-- सूत्रे ॥

लक्ष्यस्य व्याकरणत्वे दूषणान्तर–वार्तिकम् । 3 * प्रोक्तादयश्च तद्धिताः *

व्याख्याभाष्यम्— प्रोक्तादयश्च तद्धिता नोपपद्यन्ते[2] 'पाणिनिना प्रोक्तं पाणिनीयम्' । आपिशलं काशकृत्स्नमिति ।

प्रोक्ताद्यर्थानुपपत्तिसाधकभाष्यम्–नहि पाणिनिना शब्दाः प्रोक्ताः ॥

प्रोक्ताद्यर्थजिज्ञासाभाष्यम्-- किं तर्हि ? ॥

प्रोक्ताद्यर्थनिरूपणभाष्यम्-- सूत्रम् ॥

पूर्ववार्तिकस्य वैयर्थ्याशङ्काभाष्यम्-किमर्थमिदमुभयमुच्यते 'भवे', 'प्रोक्तादयश्च तद्धिता' इति । न प्रोक्तादयश्च तद्धिता इत्येव भवेपि ताद्धितश्चोदितः स्यात् ? ।

समाधानभाष्यम्— पुरस्तादिदमाचार्येण दृष्टम् 'भवे च तद्धितः' इति, तत्पठितम् । तत उत्तरकालमिदं दृष्टम् 'प्रोक्तादयश्च तद्धिताः' इति, तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ॥

लक्ष्यस्य व्याकरणत्वे प्रागुक्तदोषनिराकरणभाष्यम्— अयं तावददोषः–यदुच्यते 'शब्दे ल्युडर्थः' इति ॥ नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते ॥

ल्युडर्थनिरूपणभाष्यम्— अन्येष्वपि कारकेषु--'कृत्यल्युटो बहुलम्[3]' इति । तद्यथा प्रस्कन्दनं प्रपतनमिति ॥

१—तत्र भवः ४ । ३ । ५३ । २—तेन प्रोक्तम् ४ । ३ । १०१ ।
३—(३ । ३ । ११३)

करणसाधनतासाधकभाष्यम्—	अथवा शब्दैरपि शब्दा व्याक्रियन्ते । तद्यथा 'गौः' इत्युक्ते सर्वे सन्देहा निवर्त्तन्ते, नाश्वो, न गर्दभ इति ॥
अपरिहरणीयदूषणबोधकभाष्यम्-	अयं तर्हि दोषः–भवे-प्रोक्तादयश्च तद्धिताः–इति ॥
सिद्धान्तसमाधानभाष्यम्—	एवं तर्हि—
सिद्धान्तिवार्तिकम्—	* लक्ष्यलक्षणे व्याकरणम् *
व्याख्याभाष्यम्—	लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति ॥
लक्ष्यलक्षणपदार्थजिज्ञासाभाष्यम्-	किं पुन र्लक्ष्यं किं वा लक्षणम् ॥
लक्ष्यलक्षणपदार्थनिरूपणम्—	शब्दो लक्ष्यः सूत्रं लक्षणम् ॥
समुदायस्यपदार्थत्वेदूषणभाष्यम्-	एवमप्ययं दोषः–समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते। सूत्राणि चाप्यधीयान इष्यते–वैयाकरण इति ॥
समुदायपरत्वेदूषणनिराकरणभाष्यम्—	नैष दोषः । समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्त्तन्ते । तद्यथा पूर्वे पञ्चाला उत्तरे पञ्चालाः, तैलं भुक्तम्. घृतं भुक्तम्, शुक्लो नीलः कपिलः कृष्ण इति ॥ एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते ॥
सूत्रपाठस्यैव व्याकरणपदार्थत्वसाधकभाष्यम् ।	अथवा पुनरस्तु सूत्रम् ।
सूत्रपाठस्य व्याकरणत्वे प्रथमदोषस्मारणम्—	ननु चोक्तम्-सूत्रे व्याकरणे षष्ठ्यर्थोनुपपन्न इति ॥
सूत्रस्य व्याकरणत्वे प्रथमदोषनिराकरणम्—	नैष दोषः, व्यपदेशिवद्भावेन भविष्यति ॥
सूत्रस्य व्याकरणत्वे द्वितीयदोषस्मारणम्—	यदप्युच्यते–शब्दाप्रतिपत्तिः इति । नहि सूत्रत एव शब्दान् प्रतिपद्यन्ते । किं तर्हि ?, व्याख्यानतश्चेति ॥
सूत्रस्य व्याकरणत्वे द्वितीयदोषपरिहारस्मारणभाष्यम्—	परिहृतमेतत्–तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति ॥

द्वितीयदोषपरिहारबाधकस्मारणम्—	ननु चोक्तं न केवलानि चर्चापदानि व्याख्यानम्–वृद्धिः, आत्, ऐजिति । किं तर्हि? । उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति इति ॥
द्वितीयदोषपरिहारसाधकभाष्यम्-	अविजानत एतदेवं भवति । सूत्रत एव हि शब्दान् प्रतिपद्यन्ते ॥
सूत्राणामेव शब्दप्रतिपत्तिसाधकत्वमावश्यकम् ।	आतश्च सूत्रत एव । यो ह्युत्सूत्रं कथयेन्नादो गृह्येत ॥
वर्णोपदेशप्रयोजनाधिकरणम्— आक्षेपभाष्यम् ।	अथ किमर्थो वर्णानामुपदेशः ? ॥
वर्णोपदेशप्रथमप्रयोजनप्रदर्शकवार्तिकम् ।	* वृत्तिसमवायार्थ उपदेशः *
व्यख्याभाष्यम्—	वृत्तिसमवायार्थो वर्णानामुपदेशः ॥
वृत्तिसमवायपदार्थजिज्ञासाभाष्यम् ।	किमिदं वृत्तिसमवायार्थ इति ? ॥
वृत्तिसमवायपदविग्रहप्रदर्शनभाष्यम्—	वृत्तये समवायो वृत्ति समवाय इति । वृत्यर्थो वा समवायो वृत्तिसमवायः। वृत्ति प्रयोजनो वा समवायो वृत्तिसमवायः ॥
वृत्तिपदार्थजिज्ञासाभाष्यम्—	का पुन र्वृत्तिः ? ॥
वृत्तिपदार्थनिरूपणभाष्यम्—	शास्त्रप्रवृत्तिः ॥
समवायपदार्थजिज्ञासाभाष्यम्—	अथ कः समवायः ? ॥
समवायपदार्थनिरूपणभाष्यम्—	वर्णानामानुपूर्व्येण संनिवेशः ॥
उपदेशपदार्थजिज्ञासाभाष्यम्—	अथ क उपदेशः ? ॥
उपदेशपदार्थनिरूपणभाष्यम्—	उच्चारणम् ॥
तत्र हेतुजिज्ञासाभाष्यम्—	कुत एतत् ? ॥
हेतुनिरूपणभाष्यम्—	दिशिरुच्चारणक्रियः । उच्चार्य हि वर्णानाह 'उपदिष्टा इमे वर्णाः' इति ॥
वर्णोपदेशद्वितीयप्रयोजनप्रदर्शकवार्तिकम् ।	*अनुबन्धकरणार्थश्च *
व्याख्याभाष्यम्—	अनुबन्धकरणार्थश्च वर्णानामुपदेशः— अनुबन्धानासङ्क्ष्यामीति । नह्यनुपादिश्य वर्णाननुबन्धा शक्या आसङ्क्तुम् ॥

वर्णोपदेशे लक्ष्यसंस्कारकत्वप्रदर्शनम्— स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च । वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम् । प्रत्याहारो वृत्त्यर्थः ॥

वर्णोपदेशे तृतीयप्रयोजनवार्तिकम् * इष्टबुद्ध्यर्थश्च *

व्याख्याभाष्यम्— इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः—'इष्टान् वर्णान् भोत्स्यामहे' इति । न ह्यनुपदिश्य वर्णानिष्टावर्णाः शक्या विज्ञातुम् ।

आक्षेपवार्तिकम्— *इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः*

व्याख्या भाष्यम्— इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्तव्यः । एवंगुणा अपि हि वर्णा इष्यन्ते ।

सिद्धान्तिसमाधानवार्तिकम्— * आकृत्युपदेशात्सिद्धम् *

व्याख्याभाष्यम्— अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः । तथोवर्णाकृतिः ॥

पूर्वपक्षिण आक्षेपवार्तिकम्— *आकृत्युपदेशात्सिद्धिमिति चेत् संवृतादीनां प्रतिषेधः *

व्याख्याभाष्यम्— आकृत्युपदेशात्सिद्धिमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः ॥

संवृतादिदोषजिज्ञासाभाष्यम्—के पुनः संवृतादयः ? ॥

संवृतादिदोषपरिगणनभाष्यम्—संवृतः, कलो, ध्मात, एणीकृतो,ऽम्बूकृतो,ऽर्द्धको, ग्रस्तो, निरस्तः, प्रगीत, उपगीतः, क्ष्विण्णो, रोमश, इति ॥

आचार्यान्तरकृतपरिगणनभाष्यम्-अपर आह—'ग्रस्तं निरस्तमवलम्बितं निर्हतमम्बूकृतं ध्मातमथोविकम्पितम् । संदष्टमेणीकृतमर्धकं द्रुतं वीकीर्णमेताः स्वरदोषभावना इति ॥
अतोन्ये व्यञ्जनदोषाः ॥

सिद्धान्तिन आक्षेपनिवारणभाष्यम्-नैषदोषः ॥

सिद्धान्तिसमाधानवार्तिकम्— * गर्गादिविदादिपाठात्संवृतादीनां निवृत्तिः *

व्याख्याभाष्यम्— गर्गादिविदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति ।

आक्षेपसाधकभाष्यम्— अस्त्यन्यद् गर्गादिविदादिपाठे प्रयोजनम् ॥

प्रयोजनजिज्ञासाभाष्यम्— किम् ? ॥

प्रयोजननिरूपणभाष्यम्— समुदायानां साधुत्वं यथा स्यादिति ॥

समाधानान्तरभाष्यम्— एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि ॥

तत्करणेगौरवापत्तिभाष्यम्— सा तर्हि वक्तव्या ॥

प्रत्यापत्तिकरणस्यात्यावश्यकतावार्तिकम् । * लिङ्गार्था तु प्रत्यापत्तिः *

व्याख्याभाष्यम्— लिङ्गार्था सा तर्हि भवति ॥

प्रत्यापत्तिकरणेगौरवभाष्यम्— तत्तर्हि वक्तव्यम् ॥

प्रत्यापत्तिकरणेऽतिलाघवभाष्यम्- यद्यप्येतदुच्यते । अथवैतर्हि अनेकमनुबन्धशतं नोच्चार्यमित्सञ्ज्ञा च न वक्तव्या, लोपश्च न वक्तव्यः । यदनुबन्धैः क्रियते तत्कलादिभिः करिष्यते ॥

कलादिपाठेऽपाणिनीयत्वापत्तिः—सिद्ध्यत्येवम् । अपाणिनीयं तु भवति ॥

पाणिनीयस्यैवकरणीयताभाष्यम्–यथान्यासमेवास्तु ॥

दोषस्मारणभाष्यम्— ननु चोक्तम्—आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधः इति ॥

परिहारस्मारणभाष्यम्— परिहृतमेतत्,–गर्गादिविदादिपाठात् संवृतादीनां निवृत्ति र्भविष्यति–इति ॥

प्रयोजनान्तरस्मारणभाष्यम्— ननु चान्यद् गर्गादिविदादिपाठे प्रयोजनमुक्तम् ।

किम् ?,

समुदायानां साधुत्वं यथा स्यादिति ॥

समाधानभाष्यम्— एवं तर्ह्युभयमनेन क्रियते—पाठश्चैव विशेष्यते, कलादयश्च निवर्त्यन्ते ॥

एकेन यत्नेनोभयकार्यासिद्धिः— कथं पुनरेकेन यत्नेनोभयं लभ्यम् ? ॥

एकेनैव कार्यद्वयलाभः—	लभ्यमित्याह ॥
जिज्ञासा—	कथम् ? ॥
दृष्टान्तेन साधकभाष्यम्—	द्विगता अपि हेतवो भवन्ति । तद्यथा—'आम्राश्च सिक्ताः पितरश्च प्रीणिता' इति ।
वाक्यानामपिद्व्यर्थताभाष्यम्—	तथा वाक्यानि द्विष्ठानि भवन्ति—श्वेतो धावति, अलम्बुसानां यातेति ॥
कलादीनां शुद्धपाठेनैव निवारण-सिद्धान्तिभाष्यम्	अथवा इदं तावदयं प्रष्टव्यः—क्वेमे संवृतादयः श्रूयेरन्निति ? ॥
पूर्वपक्षिभाष्यम्—	आगमेषु ॥
सिद्धान्तिभाष्यम्—	आगमाः शुद्धाः पठ्यन्ते ॥
पूर्वपक्षिभाष्यम्—	विकारेषु तर्हि ॥
सिद्धान्तिभाष्यम्—	विकारा अपि शुद्धाः पठ्यन्ते ॥
पूर्वपक्षिभाष्यम्—	प्रत्ययेषु तर्हि ॥
सिद्धान्तिभाष्यम्—	प्रत्यया अपि शुद्धाः पठ्यन्ते ॥
पूर्वपक्षिभाष्यम्—	धातुषु तर्हि ॥
सिद्धान्तिभाष्यम्—	धातवोऽपि शुद्धाः पठ्यन्ते ॥
पूर्वपक्षिभाष्यम्—	प्रातिपदिकेषु तर्हि ॥
सिद्धान्तिभाष्यम्—	प्रातिपदिकान्यपि शुद्धानि पठ्यन्ते ।
पूर्वपक्षिभाष्यम्—	यानि तर्ह्यग्रहणानि प्रातिपदिकानि ॥
सिद्धान्तिभाष्यम्—	एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्त्तव्यः । शशः षषः इति मा भूत् । पलाशः पलाष इति मा भूत् । मञ्चको मञ्जक इति मा भूत् ॥
उपसंहारभाष्यम्—	आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः । उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः ॥ १ ॥

॥ इति प्रथमं पस्पशाह्निकम् ॥

शास्त्रारम्भसमर्थक उपोद्घात सन्दर्भग्रन्थः पस्पशा:

द्वितीयं प्रत्याहाराह्निकम्

शिवसूत्रम्—

अइउण् ॥ १ ॥

सिद्धान्तवार्तिकम्—	*अकारस्य विवृतोपदेश आकारग्रहणार्थः*
व्याख्याभाष्यम्—	अकारस्य विवृतोपदेशः कर्त्तव्यः ।
प्रयोजनजिज्ञासाभाष्यम्—	किं प्रयोजनम् ? ॥
प्रयोजननिरूपणभाष्यम्—	आकारग्रहणार्थः । अकारः सवर्णग्रहणेनाऽऽकारमपि यथा गृह्णीयात् ॥
अग्रहणकारणजिज्ञासाभाष्यम्—	किं च कारणं न गृह्णीयात् ? ॥
कारणनिरूपणभाष्यम्—	विवारभेदात् ॥
कारणे न्यूनतासाधकभाष्यम्—	किमुच्यते–विवारभेदादिति, न पुनः 'कालभेदादपि' । यथैव ह्ययं विवारभिन्नः एवं कालभिन्नोऽपि ? ॥
न्यूनताबाधकभाष्यम्—	सत्यमेव तत् । वक्ष्यति "तुल्यास्य प्रयत्नं सवर्णम्[1]" इत्यत्रास्यग्रहणस्य प्रयोजनम्–'आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्ती'ति ॥ बाह्यश्च पुनरास्यात् कालः । तेन स्यादेव कालभिन्नस्य ग्रहणम् । न पुनर्विवारभिन्नस्य ॥
विवृतोपदेशस्यैवप्रयोजनकथनस्थापनाधिकरणम् आक्षेपभाष्यम् ।	किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते, आहोस्वित् संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते ? ॥
सिद्धान्तिसमाधानभाष्यम्—	विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते ॥
हेतुजिज्ञासाभाष्यम्—	कथं ज्ञायते ? ॥
हेतुनिरूपणभाष्यम्—	यदयं—'अ अ[2]' इत्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति ॥

१—(१।१।९)

२—(८।४।६८) ॥

विवृतस्थाने संवृतो विधीयते

ज्ञापकतानिराकरणभाष्यम्— नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य प्रयोजनम् ॥

प्रयोजनजिज्ञासाभाष्यम्— किम् ? ॥

प्रयोजनकथनभाष्यम्— अतिखट्वः अतिमाल इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति, संवृतः स्यादित्येवमर्था प्रत्यापत्तिः ॥

प्रयोजननिराकरणेन ज्ञापकसाधकभाष्यम् । नैतदस्ति । नैव लोके न च वेदेऽकारो विवृतोऽस्ति ॥

जिज्ञासाभाष्यम्— कस्तर्हि ? ॥

निदर्शनभाष्यम्— संवृतः । योस्ति स भविष्यति ॥

ज्ञापकतोपसंहारः— तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्यति 'विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते' इति ॥

विशेषजिज्ञासाभाष्यम्— कः पुनरत्र विशेषः ?–विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायेत, संवृतस्योपदिश्यमानस्य वा विवृतोपदेशश्चोद्येतेति ? ॥

विशेषाभावसाधकभाष्यम्— न खलु कश्चिद्विशेषः । आहोपुरुषिकामात्रं तु भवानाह–संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते इति । वयं तु ब्रूमो–विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति ॥

अन्यत्रापिविवृतोपदेशसाधकवार्तिकम् । ※ तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः ※

व्याख्याभाष्यम्— तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशाद् अन्यत्रापि विवृतोपदेशः कर्तव्यः ॥

अन्यस्थलजिज्ञासाभाष्यम्— क्वान्यत्र ? ॥

अन्यस्थाननिरूपणभाष्यम्— धातु प्रातिपदिक प्रत्यय निपातस्थस्य ॥

प्रयोजनजिज्ञासाभाष्यम्— किं प्रयोजनम् ? ॥

प्रयोजननिरूपणभाष्यम्— 'सवर्णग्रहणार्थः' । आक्षरसमाम्नायिकेनास्य ग्रहणं यथा स्यात् ॥

अग्रहणे कारणजिज्ञासाभाष्यम्— किं च कारणं न स्यात् ? ॥

कारणनिरूपणभाष्यम्— विवारभेदादेव ।

अन्यत्र विवृतोपदेशस्य ज्ञापकज्ञाप्यत्वसाधकभाष्यम्— आचार्यप्रवृत्तिर्ज्ञापयति— भवत्याक्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति । यदयम् 'अकः सवर्णे दीर्घः'[1] इति प्रत्याहारेऽको ग्रहणं करोति ।

ज्ञापकताप्रकारजिज्ञासाभाष्यम्— कथं कृत्वा ज्ञापकम् ? ।

ज्ञापकतासाधकभाष्यम्— नहि द्वयोराक्षरसमाम्नायिकयोर्युगपत्समवस्थानमस्ति ।

ज्ञापकताबाधकभाष्यम्— नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ।

प्रयोजनजिज्ञासाभाष्यम्— किम् ? ।

प्रयोजननिरूपणभाष्यम्— यस्याक्षरसमाम्नायिकेन ग्रहणमस्ति, तदर्थमेतत्स्यात्—खट्वाढकं मालाढकमिति ।

सति प्रयोजने न ज्ञापकं भवति । तस्माद्विवृतोपदेशः कर्तव्यः ।

विवृतसंवृतोपदेशविशेषजिज्ञासाभाष्यम्— क एष यत्नश्चोद्यते, विवृतोपदेशो नाम, विवृतो वोपदिश्येत, संवृतो वा । कोन्वत्र विशेषः ? ।

विशेषोपदेशसाधकभाष्यम्— स एष सर्व एवमर्थो यत्नः क्रियते यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते, तद् गुरु भवति । तस्माद्वक्तव्यम् 'धात्वादिस्थश्च विवृत' इति ।

विवृतोपदेशे द्वितीयप्रयोजनवार्तिकम्— *दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः*

व्याख्याभाष्यम्— दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्त्तव्यः दीर्घप्लुतौ संवृतौ मा भूतामिति । वृक्षाभ्याम्[2], देवदत्ता ३[3] इति ।

१—(६ । १ । १०१) २—सुपि च ७ । ३ । १०२ ।
३—वाक्यस्य टेः प्लुत उदात्तः ८ । २ । ८२ ।

द्वितीयप्रयोजनबाधकभाष्यम्— नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ स्तः।

जिज्ञासाभाष्यम्— कौ तर्हि?।

जिज्ञासासमाधानभाष्यम्— विवृतौ।

यौ स्तस्तौ भविष्यतः।

संवृतकल्पकभाष्यम्— 'स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम्'। संवृतः स्थानी संवृतौ दीर्घप्लुतौ प्रकल्पयेत्। 'अनुस्वारो यथा यणम्'। तद्यथा—सँय्यन्ता, सँव्वत्सरः, यँल्लोकम्, तँल्लोकमिति—अनुस्वारः स्थानी[1] (अनुनासिकः) यणमनुनासिकं प्रकल्पयति।

संवृतकल्पनाबाधकभाष्यम्— विषम उपन्यासः। युक्तं यत्सतस्तत्र प्रक्लृप्तिर्भवति। सन्ति हि यणः सानुनासिका निरनुनासिकाश्च। दीर्घप्लुतौ पुनर्नैव लोके नैव च वेदे संवृतौ स्तः।

जिज्ञासाभाष्यम्— कौ तर्हि?।

समाधानभाष्यम्— विवृतौ। यौ स्तस्तौ भविष्यतः।

पूर्वपक्षभाष्यम्— एवमपि कुत एतत्—तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतः, न पुनस्तुल्यप्रयत्नौ स्थानभिन्नौ स्यातामिकार ऊकारो वेति?।

स्थानीत्यादिकल्पनायां सत्यामपि

सिद्धान्तिसमाधानभाष्यम्— वक्ष्यति 'स्थानेन्तरतमः[2]' इत्यत्र स्थान इत्यनुवर्तमाने पुनः स्थाने ग्रहणस्य प्रयोजनम् 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयो भवति' इति।

पूर्वपक्षवार्तिकम्— * तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् *

व्याख्याभाष्यम्— तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति 'अस्य च्वौ[3]' 'यस्येति च[4]'

१—वा पदान्तस्य ८।४।५९। २—(१।१।५०)
३—(७।४।३२) ४—(६।४।१४८)

कारणजिज्ञासाभाष्यम्— किं कारणम् ?।

कारणनिरूपणभाष्यम्— अनण्त्वात्। नह्येतेऽणः येनुवृत्तौ।

अणूजिज्ञासाभाष्यम्— के तर्हि ?।

अणूप्रदर्शनभाष्यम्— येऽक्षरसमाम्नाये उपदिश्यन्ते।

समाधानवार्तिकम्— * एकत्वादकारस्य सिद्धम् *

व्याख्याभाष्यम्— एकोयमकारो यश्चाक्षरसमाम्नाये, यश्चानुवृत्तौ, यश्च धात्वादिस्थः।

समाधानबाधकवार्तिकम्— * अनुबन्धसंकरस्तु *

व्याख्याभाष्यम्— अनुबन्धसङ्करस्तु प्राप्नोति। 'कर्मण्यण्[1]' 'आतोनुपसर्गे कः[2]' इति केऽपि णित्कृतं प्राप्नोति।

समाधानबाधकवार्तिकम्— *एकाजनेकाज्ग्रहणेषु चानुपपत्तिः*

व्याख्याभाष्यम्— एकाजनेकाज्ग्रहणेषु चानुपपत्तिर्भवति।

दोषजिज्ञासाभाष्यम्— तत्र कोदोषः ?।

दोषप्रदर्शनभाष्यम्— किरिणा गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं[3] प्राप्नोति। इह च घटेन तरति घटिक[4] इति द्व्यज्लक्षणः ष्ठन्न प्राप्नोति।

समाधानबाधकवार्तिकम्— * द्रव्यवच्चोपचाराः *

व्याख्याभाष्यम्— द्रव्यवच्चोपचाराः प्राप्नुवन्ति। तद्यथा द्रव्येषु नैकेन घटेनानेको युगपत् कार्यं करोति। तथैवमिममकारं नानेको युगपदुच्चारयेत्।

अनुबन्धसंकराक्षेपसमाधानवार्तिकम्।— *विषयेण तु नानालिङ्गकरणात्सिद्धम्*

व्याख्याभाष्यम्— यदयं विषये विषये नानालिङ्गमकारं करोति—'कर्मण्यण्' 'आतोनुपसर्गे क' इति तेन ज्ञायते—नानुबन्धसङ्करोस्तीति। यदि हि स्यात्, नानालिङ्गकरणमनर्थकं स्यात्. एकमेवायं सर्वगुणमुच्चारयेत्।

१—(३।२।१) २—(३।२।३)
३—सावेकाचस्तृतीयादिर्विभक्तिः ६।१।१६८॥
४—नौद्व्यचष्ठन् ४।४।७॥

ज्ञापकबाधकभाष्यम्— नैतदस्ति ज्ञापकम्। इत्संज्ञाप्रक्लृप्त्यर्थमेतत् स्यात्। न ह्ययमनुबन्धैः शल्यकवच्छक्य उपचेतुम्। इत्संज्ञायां हि दोषः स्यात् आयस्य हि द्वयोरित्संज्ञा स्यात्॥

जिज्ञासाभाष्यम्— कयोः ?।

समाधानभाष्यम्— आद्यन्तयोः॥

वार्तिकपाठव्यस्यासभाष्यम्— एवं तर्हि—

वार्तिकपाठः— *विषयेण तु पुनर्लिङ्गकरणात्सिद्धम्*

व्याख्याभाष्यम्— यदयं विषये विषये पुनर्लिङ्गमकारं करोति 'प्राग्दीव्यतोऽण्[1] "शिवादिभ्योऽण्[2]' इति तेन ज्ञायते नानुबन्धसङ्करोस्तीति। यदि हि स्यात् पुनर्लिङ्गकरणमनर्थकं स्यात्॥ अथवा पुनरस्तु—

प्रागुक्तवार्तिकपाठस्थापनभाष्यम्- *विषयेण तु नानालिङ्गकरणात्सिद्धम्* इत्येव।

प्रागुक्तदूषणस्मारणभाष्यम्— ननु चोक्तम्-इत्संज्ञाप्रक्लृप्त्यर्थमेतत्स्यात्-इति।

दूषणवारणभाष्यम्— नैष दोषः। लोकत एतत्सिद्धम्। तद्यथा लोके कश्चिदेवं देवदत्तमाह—'इह मुण्डोभव, इह जटिलो भव, इह शिखी भवति यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपतिष्ठते। एवमयमकारो यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थास्यते॥

द्वितीयदूषणवार्तिकानुवादभाष्यम्-यदप्युच्यते—एकाजनेकाज्ग्रहणेषु चानुपपत्तिः इति॥

द्वितीयदूषणवारकवार्तिकम्— *एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात्*

व्याख्याभाष्यम्— एकाजनेकाज्ग्रहणेषु चावृत्तेः संख्यानादनेकाच्त्वं भविष्यति। तद्यथा—'सप्तदश सामिधेन्यो भवन्ति" इति "त्रिः

1-(४। १। ८२) २-(४। १। ११२)

प्रथमामन्वाह त्रिरुत्तमाम्" इत्यावृत्तितः सप्तदशत्वं भवति । एवमिहाप्यावृत्तितोऽनेकाच्त्वं भविष्यति ॥

अतिप्रसङ्गतादवस्थ्यभाष्यम्— भवेदावृत्तितः कार्यं परिहृतम् । इह तु खलु—किरिणा गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोत्येव ॥

अतिप्रसङ्गनिवारणभाष्यम्— एतदपि सिद्धम् ॥

हेतुजिज्ञासाभाष्यम्— कथम् ? ॥

हेतुनिदर्शनभाष्यम्— लोकतः । तद्यथा—ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्त्वा तया सर्वे ते सहस्रदक्षिणाः संपन्नाः । एवमिहाप्यनेकाच्त्वं भविष्यति ॥

तृतीयदूषणवार्तिकानुवादभाष्यम्- यदप्युच्यते—द्रव्यवच्चोपचाराः प्राप्नुवन्तीति ।

तृतीयदूषणवारणभाष्यम्— भवेद् यदसंभवि कार्यम्, तन्नानेको युगपत्कुर्यात् । यत्तु खलु संभवि कार्यमनेकोपितद्युगपत्करोति । तद्यथा—घटस्य दर्शनं स्पर्शनं वा । संभवि चेदंकार्यमकारस्योच्चारणं नाम अनेकोपि तद्युगपत्करिष्यति ॥

नानात्वसाधकपूर्वपक्षिवार्तिकम्— *आन्यभाव्यं तु कालशब्दव्यवायात्*

व्याख्याभाष्यम्— आन्यभाव्यं त्वकारस्य ॥

हेतुजिज्ञासाभाष्यम्— कुतः ? ।

हेतुनिरूपणभाष्यम्— 'कालशब्दव्यवायात् ।' कालव्यवायाच्छब्दव्यवायाच्च । कालव्यवायात्—दण्ड+अग्रम् । शब्दव्यवायाद्—दण्डः । न चैकस्यात्मनो व्यवायेन भवितव्यम् । भवति चेद्भवत्यान्यभाव्यमकारस्य ॥

नानात्वसाधकं द्वितीयंवार्तिकम्- *युगपच्च देशपृथक्त्वदर्शनात् *

व्याख्याभाष्यम्— युगपच्च देशपृथक्त्वदर्शनान्मन्यामहे—'आन्यभाव्यमकारस्येति । यदयं युगपद्देशपृथक्त्वेषूपलभ्यते-अश्वः, अर्कः,

अर्थ इति । न ह्येको देवदत्तो युगपत्स्रुघ्ने च भवति मथुरायां च ॥

एकत्ववादिवार्तिकशेषभाष्यम्— यदि पुनरिमे वर्णाः—

एकत्वसाधकवार्तिकम्— * शकुनिवत्स्युः *

व्याख्याभाष्यम्— तद्यथा—शकुनय आशुगामित्वात्पुरस्तादुत्पतिताः पश्चाद्दृश्यन्ते । एवमयमकारो 'द' इत्यत्र दृष्टो 'ण्ड' इत्यत्र दृश्यते ॥

नानात्ववादिभाष्यम्— नैवं शक्यम् । अनित्यत्वमेवं स्यात् । नित्याश्च शब्दाः । नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । यदि चायं 'द' इत्यत्र दृष्टो 'ण्ड' इत्यत्र दृश्येत, नायं कूटस्थः स्यात् ॥

एकत्ववादिवार्तिकशेषभाष्यम्— यदि पुनरिमेवर्णाः—

एकत्वसाधकवार्तिकम्— *आदित्यवत्स्युः *

व्याख्याभाष्यम्— तद्यथा एक आदित्योऽनेकाधिकरणस्थो युगपद्देशपृथक्त्वेषूपलभ्यते [[2]एवमयमकारोऽपि युगपद् देशपृथक्त्वेषूपलभ्यते] ॥

नानात्ववादिभाष्यम्— विषम उपन्यासः—नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपद्देशपृथक्त्वेषूपलभते । अकारं पुनरुपलभते ॥

एकत्ववादिभाष्यम्— अकारमपि नोपलभते ।

कारणजिज्ञासाभाष्यम्— किं कारणम् ॥

कारणनिरूपणभाष्यम्— श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलितः आकाशदेशः शब्दः । एकं च पुनराकाशम् ॥

---

१. मीमांसा १ । १ । १५ ॥

२. अयं भाष्यपाठः भाष्यशैलीसिद्धोऽत्यावश्यकोपि प्राचीनतरलेखकप्रमादेन नष्टो भवेत् ॥

नानात्ववादिभाष्यम्— आकाशदेशा अपि बहवः । यावता बहवः, तस्मादान्यभाव्यमकारस्य ॥

सिद्धान्तवार्तिकम्— * आकृतिग्रहणात्सिद्धम् *

व्याख्याभाष्यम्— अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति, तथेवर्णाकृतिः, तथोवर्णाकृतिः ॥

आकृतिग्रहणसाधकवार्तिकम्-- * तद्वच्च तपरकरणम् *

व्याख्याभाष्यम्— एवं च कृत्वा तपराः क्रियन्ते-आकृतिग्रहणेनातिप्रसक्तमिति ॥

तपरकरणस्य प्रयोजनान्तरभाष्यम्-प्रत्याख्यायते तत् —सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्च, इति ॥

आकृतिग्रहणस्यावश्यकतावार्तिकम् * हल्ग्रहणेषु च *

व्याख्याभाष्यम्— [हल्ग्रहणेषु च ।]

समाधानभाष्यम्— 'आकृतिग्रहणात्सिद्धम्' इत्येव । 'झलोझलि'[1] अवात्ताम् अवात्तम् अवात्त। यत्रैतन्नास्ति—'अण् सवर्णान्गृह्णाति' इति ॥

सिद्धान्तवार्तिकम्— * रूपसामान्याद्वा *

व्याख्याभाष्यम्— रूपसामान्याद्वा सिद्धमेतत् । तद्यथा 'तानेव शाटकानाच्छादयामः, ये मथुरायाम्' 'तानेव शालीन् भुञ्ज्महे, ये मगधेषु', 'तदेवेदं भवतः कार्षापणं यन्मथुरायां गृहीतम्' अन्यस्मिंश्चान्यस्मिन् रूपसामान्यात् 'तदेवेदम्' इति भवति । एवमिहापि रूपसामान्यात्सिद्धम्[2] ॥

प्रत्याहारसूत्रम्-- ऋलृक् ॥ २ ॥

पूर्वपक्षिजिज्ञासाभाष्यम्— अथ लृकारोपदेशः किमर्थः ? ॥

जिज्ञासायां विशेषजिज्ञासाभाष्यम्-किं विशेषेण लृकारोपदेशश्चोद्यते, न पुनरन्येषामपि वर्णानामुपदेशश्चोद्यते। यदि किंचिदन्येषामपि वर्णानामुपदेशे

---

(१) ८।२।२६ । (२) अणुदित्सवर्णस्य चाप्रत्ययः । १।१।६९ ॥

प्रयोजनमस्ति ऌकारोपदेशस्यापि तद् भवितुमर्हति। को वा विशेषः ?।

विशेषनिरूपणभाष्यम्—— अयमस्ति विशेषः । अस्य हि ऌकारस्याल्पीयांश्चैव प्रयोगविषयः यश्चापि प्रयोगविषयः सोपि क्लृप्तिस्थस्यैव । कृपेश्च लत्वमसिद्धम्[1] । तस्यासिद्धत्वादृकारस्यैवाच्कार्याणि भविष्यन्ति । नार्थ ऌकारोपदेशेन ॥

सिद्धान्तिसमाधानवार्तिकावतरणभाष्यम् । —— अत उत्तरं पठति—

सिद्धान्तिसमाधानवार्तिकम्- * ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः *

व्याख्याभाष्यम्—— ऌकारोपदेशः क्रियते यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थःप्लुत्याद्यर्थश्च ॥

यदृच्छाशब्दनिरूपणम्—— यदृच्छाशब्दार्थस्तावत्-यदृच्छया कश्चिद् ऌतको नाम । तस्मिन्नच्कार्याणि यथा स्युः—दध्य्ऌतकाय देहि, मध्व्ऌतकाय देहि. उदङ्ङ्ऌतकोऽगमत् प्रत्यङ्ङ्ऌतकोऽगमत् । चतुष्टयी शब्दानां प्रवृत्तिः–जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चतुर्थाः ॥

अशक्तिजानुकरणोदाहरणभाष्यम्—— अशक्तिजानुकरणार्थः—अशक्त्या कयाचित् ब्राह्मण्या 'ऋतक' इति प्रयोक्तव्ये 'ऌतक' इति प्रयुक्तम् । तस्यानुकरणं 'ब्राह्मण्य्ऌतक इत्याह' 'कुमार्य्ऌतक' इत्याहेति ॥

प्लुत्याद्यर्थोदाहरणभाष्यम्—— प्लुत्याद्यर्थश्च (ऌकारोपदेशः कर्तव्यः)

प्लुत्यादिजिज्ञासाभाष्यम्— के पुनः प्लुत्यादयः ॥

---

(१) कृपो रोलः । ८ । २ । १८ ॥

प्लुत्यादिनिरूपणभाष्यम्— प्लुतिद्विर्वचनस्वरिताः । क्लृ३प्तशिख[1] । क्लृप्तः[2] । प्रक्लृप्तः[3] । प्लुत्यादिषु कार्येषु क्लृपेर्लत्वं सिद्धम् । तस्य सिद्धत्वादच्कार्याणि न सिध्यन्ति । तस्माद् ऌकारोपदेशः क्रियते ॥

प्रयोजननिराकरणवार्तिकशेषभाष्यम् ।— नैतानि सन्ति प्रयोजनानि ।

प्रयोजननिराकरणवार्तिकम्— * न्याय्यभावात्कल्पनं संज्ञादिषु *

व्याख्याभाष्यम्— न्याय्यस्य ऋतकशब्दस्य भावात् कल्पनं संज्ञादिषु साधु मन्यन्ते—ऋतक एवासौ न ऌतक इति ॥

व्याख्यान्तरभाष्यम्— अपर आह—न्याय्य ऋतकशब्दः शास्त्रान्वितोस्ति । स कल्पयितव्यः साधुः संज्ञादिषु ऋतक एवासौ,न ऌतक इति॥

अपरिहार्ययदृच्छाशब्दोदाहरणभाष्यम् ।— अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः—ऌफिडः ऌफिड्डश्चेति ॥

अस्यापिपरिहार्यताबोधकभाष्यम्-एषोऽपि ऋफिडः, ऋफिड्डश्च ।

हेतुजिज्ञासाभाष्यम्-- कथम् ? ॥

हेतुनिरूपणभाष्यम्-- फिडफिड्डावौणादिकौ प्रत्ययौ ॥ त्रयी च शब्दानां प्रवृत्तिः—जातिशब्दा गुणशब्दाः क्रियाशब्दा इति । न सन्ति यदृच्छाशब्दाः ॥

---

१. गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ८ । २ । ८६ ॥ ऋऌवर्णयोर्मिथः सावर्ण्यमितिसंज्ञामाश्रित्य 'अनृतः' इति प्रतिषेधस्तु न प्रवर्त्तते । भाष्यकृतासवर्णसंज्ञाप्रयोजनस्य 'वासुप्यापिशलेः ६ । १ । ९२, ऋत्यकः ६ । १ । १२८' इति सूत्रविषयत्वेनैवदर्शितत्वात् अत एव भिन्न भिन्न कार्यार्थं धातुषु ऋत्ऌतोः पृथगनुबन्धकरणं चरितार्थम् ।

२. अनचि च ८। ४ । ४७ ॥

३. गतिरनन्तरः ६ । २ । ४९; अनुदात्तं पदमेकवर्जम् ६ । १ । १५८ उदात्तादनुदात्तस्य स्वरितः ८ । ४ । ६६ ॥ स्वरितात्संहितायामनुदात्तानाम् १ । २ । ३९ ॥

पक्षान्तरेण परिहारस्यायोग्यता-भाष्यम्। — अन्यथा कृत्वा प्रयोजनमुक्तम् अन्यथा कृत्वा परिहारः। सन्ति यदृच्छाशब्दा इति कृत्वा प्रयोजनमुक्तम्, न सन्तीति परिहारः। समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्तको भवति। तद्यथा देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति, न गाव्यादीन्॥

पक्षान्तरैरपि परिहाराणां योग्यता-भाष्यम्। — नैष दोषः। पक्षान्तरैरपि परिहारा भवन्ति।

अशक्तिजानुकरणार्थत्वनिराकरण-वार्तिकम्— ***अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु ***

व्याख्याभाष्यम्— अनुकरणं हि शिष्टस्य वा साधु भवति अशिष्टाप्रतिसिद्धस्य वा नैव तद्दोषाय भवति। नाभ्युदयाय॥ 'यथा लौकिक वैदिकेषु'। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु।

शिष्टानुकरणे लौकिकोदाहरण-भाष्यम्— लोके तावत्-य एवमसौ ददाति, य एवमसौ यजते, य एवमसावधीते इति। तस्यानुकुर्वन् दद्याच्च यजेत चाधीयीत च। सोप्यभ्युदयेन युज्यते।

शिष्टानुकरणे वैदिकोदाहरणभाष्यम्— वेदेऽपि-'य एवं विश्वसृजः सत्त्राण्यध्यासते' इति। तेषामनुकुर्वन् तद्वत्सत्त्राण्यध्यासीत। सोऽप्यभ्युदयेन युज्यते।

अशिष्टाप्रतिषिद्धानुकरणोदाहरण-भाष्यम्। — अशिष्टाप्रतिषिद्धं यथा-य एवमसौ हिक्कति य एवमसौ हसति,य एवमसौ कण्डूयतीति तस्यानुकुर्वन् हिक्केच्च, हसेच्च, कण्डूयेच्च, नैव तद्दोषाय स्यान्नाभ्युदयाय।

आर्थिकप्रतिषिद्धानुकरणोदाहरणभाष्यम्— यस्तु खल्वसौ ब्राह्मणं हन्ति, एवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात् सुरां वा पिबेत्, सोऽपि मन्ये पतितः स्यात्।

उदाहरणवैषम्यभाष्यम्— विषम उपन्यासः। यश्चैवं हन्ति, यश्चानु हन्ति, उभौ तौ हतः। यश्चापि पिबति, यश्चानुपिबति, उभौ तौ पिबतः।

प्रतिषिद्धानुकरणे दोषाभावभाष्यम्— यस्तु खल्वेवमसौ ब्राह्मणं हन्ति, एवमसौ सुरां वा पिबतीति तस्यानुकुर्वन् स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात् पयो वा पिबेत्, न स मन्ये पतितः स्यात्।

प्रयोजनप्रत्याख्यानभाष्यम्— एवमिहापि य एवमसावपशब्दं प्रयुङ्क्ते इति तस्यानुकुर्वन्नपशब्दं प्रयुञ्जीत, सोऽप्यपशब्दभाक् स्यात्।

प्रयोजनस्थापनभाष्यम्— अयं त्वन्योपशब्दपदार्थकः शब्दो, यदर्थ उपदेशः कर्तव्यः। न चापशब्दपदार्थकः शब्दोपशब्दो भवति। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यतेऽपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति, अपशब्द इत्येव तस्यापशब्दःस्यात्। न चैषोपशब्दः।

अपरिहार्यप्रयोजनभाष्यम्— अयं खल्वपि भूयोनुकरणशब्दोऽपरिहार्यः यदर्थ उपदेशः कर्तव्यः—साध्वॢकारमधीते, मध्वॢकारमधीते इति॥

अनुकार्यजिज्ञासाभाष्यम्— कस्थस्य पुनरेतदनुकरणम्?॥

अनुकार्यनिरूपणभाष्यम्— क्लृपिस्थस्य।

प्रयोजननिराकरणभाष्यम्— यदि क्लृपिस्थस्य, क्लृपेश्च लत्वमसिद्धम् तस्यासिद्धत्वादृकार एवाच्कार्याणि भविष्यन्ति॥

प्रयोजनसाधकभाष्यम्— भवेत्तदर्थेन नार्थः स्यात्। अयं त्वन्यः क्लृपिस्थपदार्थकः शब्दः, यदर्थ उपदेशः कर्तव्यः।

परिभाषाप्रयोजनबाधकभाष्यम्— न कर्तव्यः। इदमवश्यं कर्तव्यम् 'प्रकृतिवदनुकरणं भवति' इति॥

प्रयोजनजिज्ञासाभाष्यम्— किं प्रयोजनम् ? । 'द्विः पचन्त्वित्याह' तिङ्ङतिङ[1] इति निघातो यथा स्यात् ।

प्रयोजननिरूपणभाष्यम्— 'अग्नी इत्याह' 'ईदूदेद्द्विवचनं प्रगृह्यम्'[2] इति प्रगृह्यसंज्ञा यथा स्यात् ।

प्रकृतोपसंहारभाष्यम्— यदि-प्रकृतिवदनुकरणं भवतीत्युच्यते, अपशब्द एवासौ भवति कुमार्य्लृतक इत्याह, ब्राह्मण्य्लृतक इत्याह, अपशब्दो ह्यस्य प्रकृतिः ।

लृकारप्रयोजनसाधकभाष्यम्— न चापशब्दः प्रकृतिः । न ह्यपशब्दा उपदिश्यन्ते । न चानुपदिष्टा प्रकृतिरस्ति ।

पूर्वपक्षिणः प्लुत्यादिप्रयोजन— प्रत्याख्यानवार्तिकम्— *एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः*

व्याख्याभाष्यम्— 'एकदेशविकृतमनन्यवद्भवति' इति प्लुत्यादयोऽपि भविष्यन्ति ।

परिभाषायां दूषणभाष्यम्— यदि 'एकदेशविकृतमनन्यवद्भवति' इत्युच्येत 'राज्ञः क च'[3] राजकीयम् 'अल्लोपोनः'[4] इति लोपः प्राप्नोति ॥

शेषपूर्त्या दूषणनिराकरणभाष्यम्—एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य ।

दूषणस्थापनभाष्यम्— यदि—षष्ठीनिर्दिष्टस्येत्युच्यते 'क्लृप्तशिख इतिप्लुतो न प्राप्नोति । न ह्यत्र ऋकारः षष्ठीनिर्दिष्टः ।

षष्ठीनिर्दिष्टजिज्ञासाभाष्यम्— कस्तर्हि ।

षष्ठीनिर्दिष्टनिरूपणभाष्यम्— रेफः ।

दूषणवारणभाष्यम्— ऋकारोऽप्यत्रषष्ठीनिर्दिष्टः ।

पदविभागजिज्ञासाभाष्यम्— कथम् ? ।

पदविभागप्रदर्शनभाष्यम्— अविभक्तिको निर्देशः-कृप उः रः लः 'कृपो रो ल' इति ।

१—(८ । १ । २८) २—(१ । १ । ११)

३—(४-२-१४०) ४—(६ । ४ । १३४)

परिभाषायांशेषपूर्तिनिषेधभाष्यम्- अथवा पुनरस्तु अविशेषेण ॥

शेषापूर्तौ प्रागुक्तदोषस्मारणभाष्यम्— ननुचोक्तं 'राज्ञः क च' राजकीयम् 'अल्लोपोनः' इति प्राप्नोति इति।

दोषानिराकरणभाष्यम्— नैष दोषः । वक्ष्यत्येतत्—''श्वादीनां संप्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम्[1]'' इति । तत्प्रकृतमुत्तरत्रानुवर्तिष्यते–' अल्लोपोनः' नकारान्तस्येति ॥

प्लुताप्राप्तिभाष्यम्— इह तर्हि क्लृ३प्तशिख 'अनृतः[2]'इति प्रतिषेधः प्राप्नोति ॥

न्यासान्तरेणप्लुतप्राप्तिवार्तिकम्- * रवत्प्रतिषेधाच्च *

व्याख्याभाष्यम्— रवत्प्रतिषेधाच्चैतत्सिध्यति।'गुरोररवतः' इति वक्ष्यामि ॥

न्यासान्तरे दूषणभाष्यम्— यदि 'अरवतः' इत्युच्यते होतृ+ऋकार 'होतृ३कार' अत्र न प्राप्नोति ॥

न्यासान्तरे शेषपूर्त्यां दोषवारणभाष्यम्— 'गुरोररवतो ह्रस्वस्य' इति वक्ष्यामि ॥

सिद्धान्तिनः ऌकारोपदेशप्रत्याख्यानस्य महाकष्टसाध्यत्वेनानाश्रयणमेववरमित्युपसंहारभाष्यम्- स एष सूत्रभेदेन ऌकारोपदेशः प्लुत्याद्यर्थः सन् प्रत्याख्यायते, सैषा महतो वंशस्तम्बाल्लट्वानुकृष्यते ।

प्रत्याहारसूत्रे— ए ओङ् ॥ ३ ॥ ऐ औच् ॥ ४ ॥

विचारणीयभाष्यम्— इदं विचार्यते–इमानि संध्यक्षराणि तपराणि वोपदिश्येरन् 'एत् ओत् ङ्' 'ऐत् औत्, च्' इति अतपराणि वा यथान्यासम् इति ॥

विशेषजिज्ञासाभाष्यम्— कश्चात्र विशेषः ? ॥

तपरोपदेशे प्रथम दूषणवार्तिकम्-* संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम् *

---

१ श्वयुवमघोनामतद्धिते ६ । ४ । १३३ ॥ २ गुरोरनृतोनन्त्यस्याप्येकैकस्य प्राचाम् ८ । २ । ८६ ॥

व्याख्याभाष्यम्— संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्त्तव्यम् ।

तपरोपदेशे द्वितीयदूषणवार्तिकम्-* प्लुत्यादिष्वज्विधिः *

वार्तिकव्याख्याभाष्यम्— प्लुत्यादिष्वजाश्रयो विधिर्नसिध्यति । गो३त्रात नौ३त्रात इत्यत्र 'अनचि च'[1] इत्यच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोति ॥

इह च प्रत्यङ्ङ्३तिकायन उदङ्ङ्३पगव इति 'अचि'[2] इति ङमुडागमो न प्राप्नोति ।

तपरोपदेशे तृतीयदूषणवार्तिकम्-* प्लुतसंज्ञा च *

प्लुतसंज्ञा च न सिध्यति ॥ ऐ३तिकायन औ३पगव 'ऊकालोऽज्ह्रस्वदीर्घप्लुतः'[3] इति प्लुतसंज्ञा न प्राप्नोति ॥

अतपरोपदेशमङ्गीकरणभाष्यम्-सन्तु तर्ह्यतपराणि ॥

अतपरोपदेशे प्रथमदूषणवार्तिकम्-* अतपर एच इग्घ्रस्वादेशे *

वार्तिकव्याख्याभाष्यम्— यद्यतपराणि, 'एच इग्घ्रस्वादेशे'[4] इति वक्तव्यम् ॥

प्रयोजनजिज्ञासाभाष्यम्— किं प्रयोजनम् ? ॥

प्रयोजननिरूपणभाष्यम्— एचो (ङो) ह्रस्वादेशशासनेष्वर्ध एकारोऽर्ध ओकारो वा मा भूदिति ॥

सूत्रावश्यकताभाष्यम्— ननु च यस्यापि तपराणि, तेनाप्येतद्वक्तव्यम् । इमावैचौ समाहारवर्णौ—मात्रावर्णस्य, मात्रेवर्णोवर्णयो स्तयो र्ह्रस्वादेशशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ; मा कदाचिदवर्णो भूदिति ।

ऐजंशे सूत्रानावश्यकताभाष्यम्-प्रत्याख्यायत एतत्—'ऐचोश्चोत्तरभूयस्त्वात्' इति ।

१—(८ । ४ । ४७) २—(८ । ३ । ३२)
३—(१ । २ । २७) ४—(१ । ३ । ४८)

एङंशेऽपि सूत्रानावश्यकता-भाष्यम्—	यदि प्रत्याख्यानपक्षः, इदमपि प्रत्याख्यायते—'सिद्धमेङः सस्थानत्वात्' इति ।
एङंशे सूत्रावश्यकताभाष्यम्—	ननु चैङःसस्थानतरावर्धं एकारोऽर्धं ओकारः ।
सूत्रानावश्यकताभाष्यम्—	न तौ स्तः ।
तयोरभावे कारणभाष्यम्—	यदि हि तौ स्यातां तावेवायमुपदिशेत् ।
तयोः सत्त्वसाधकभाष्यम्—	ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते –सुजाते एश्वसूनृते, अध्वर्यो ओद्रिभिः सुतम्, शुक्रं ते एन्यद्, यजतं ते एन्यत् इति ।
तयोरसत्त्वसाधकभाष्यम्—	पारिषदकृतिरेषा तत्रभवताम् । नैव हि लोके नान्यस्मिन्वेदेऽर्धं एकारोऽर्धं ओकारो वास्ति ।
अतपरोपदेशाद्वितीयदूषणवार्तिकम्	* एकादेशे दीर्घग्रहणम् *
व्याख्याभाष्यम्——	एकादेशे दीर्घग्रहणं कर्तव्यम्-'आद्गुणो[1] दीर्घः' 'वृद्धिरेचि[2] दीर्घः' इति ।
प्रयोजनजिज्ञासाभाष्यम्—	किं प्रयोजनम् ? ।
प्रयोजननिरूपणभाष्यम्—	आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति खट्वा+इन्द्रः=खट्वेन्द्रः, 'खट्वा+उदकम्=खट्वोदकम्', 'खट्वा+ईषा=खट्वेषा', खट्वा+ऊढा=खट्वोढा', खट्वा+एलका=खट्वैलका, खट्वा+ओदनः=खट्वौदनः, खट्वा+ऐतिकायनः=खट्वैतिकायनः । खट्वा+औपगवः खट्वौपगवः इति ।
तटस्थस्य गौरवाक्षेपभाष्यम्—	तत्तर्हि दीर्घग्रहणं कर्तव्यम् ? ।
सिद्धान्तिसमाधानभाष्यम्—	न कर्तव्यम् । उपरिष्टाद्योगविभागः करिष्यते—'अकः सवर्णे' एको भवति ।

१—(६ । १ । ८७ ॥)

२—(६ । १ । ८८ ॥)

ततो 'दीर्घः' दीर्घश्च स भवति । यः स 'एकः पूर्वपरयोः' इत्येव निर्दिष्ट इति ।

एकादेशस्य दीर्घनियमे दूषणभाष्यम्। — इहापि तर्हि प्राप्नोति—पशुम्[2], विद्धम्[3], पचन्तीति।

दूषणनिराकरणभाष्यम्— नैष दोषः।

पूर्वरूपदोषनिराकरणभाष्यम्— इहतावत्पशुमिति "अम्येकः" इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनं—यथा जातीयकः पूर्वस्तथाजातीयक उभयोर्यथा स्यादिति।

संप्रसारणे दोषनिराकरणभाष्यम्-विद्धमिति। पूर्व इत्येवानुवर्तते। अथवाचार्यप्रवृत्तिर्ज्ञापयति—'नानेन संप्रसारणस्य दीर्घोभवति' इति यदयम् हलः[5]उत्तरस्यसंप्रसारणस्यदीर्घत्वं शास्ति।

पररूपे दोषनिराकरणभाष्यम्— पचन्तीति। 'अतो गुणेपरः'[4]इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यद्रूपग्रहणं करोति तस्यैतत्प्रयोजनम्—यथा जातीयकं परस्य रूपं तथा जातीयकमुभयोर्यथा स्यादिति।

दूषणान्तरभाष्यम्— इह तर्हि खट्वर्श्यौ मालर्श्यं इति दीर्घवचनादकारो न, अनान्तर्यादेकारौकारौ न।

दोषजिज्ञासाभाष्यम्— (तत्र को दोषः?)।

दोषनिरूपणभाष्यम्— विगृहीतस्य श्रवणं प्रसज्येत।

दूषणनिराकरणभाष्यम्— न ब्रूयो यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति।

विवक्षितजिज्ञासाभाष्यम्— किं तर्हि?।

विवक्षितनिरूपणभाष्यम्— यत्र क्रियमाणे न दोषस्तत्र कर्तव्यमिति॥

क्रियमाणदेशजिज्ञासाभाष्यम्— क च क्रियमाणे न दोषः?॥

१—अकःसवर्णे दीर्घः ६।१।१०१॥ २—अमि पूर्वः ६।१।१०७॥
३—संप्रसारणाच्च ६।१।१०८॥ ४—अतो गुणे ६।१।९७॥
५—हलः ६।४।२॥

क्रियमाणदेशनिरूपणभाष्यम्— संज्ञाविधौ—वृद्धिरादैच्[1] दीर्घः, अदेङ् गुणो[2] दीर्घः इति ॥

दीर्घग्रहणकर्तव्यतायांगौरवभा०— तत्तर्हि दीर्घग्रहणं कर्तव्यम् ॥

अकर्तव्यतयां लाघवभाष्यम्— न कर्तव्यम् ॥

त्रिचतुरमात्रादेशवारणहेतुजिज्ञासाभाष्यम्।— कस्मादेवान्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनांत्रिमात्रचतुर्मात्राआदेशान भवन्ति ?।

वारणहेतुनिरूपणभाष्यम्— तपरे गुणवृद्धी ॥

वारणहेतुवाधकबहुव्रीहिभाष्यम्—ननु च तः परो यस्मात्सोऽयं तपरः ॥

वारणहेतुसाधकतत्पुरुषभाष्यम्— नेत्याह, तादपि परस्तपरः 'ऋदोरप्[3]' इतीहैव स्यात्—यवः स्तवः, लवः पव इत्यत्र न स्यात् ॥

तत्पुरुषेपि तकारानिर्देशनिरूपणभाष्यम् ॥ नैष तकारः ।

निर्दिष्टजिज्ञासाभाष्यम्— कस्तर्हि ?।

निर्दिष्टनिरूपणभाष्यम्— दकारः ॥

दकारनिर्देशप्रयोजनजिज्ञासाभा० किं दकारे प्रयोजनम् ? ॥

तकारनिर्देशप्रयोजनजिज्ञासाभा० अथ किं तकारे ?।

असंदेहार्थत्वस्योभयत्रसाम्यभा० यद्यसंदेहार्थस्तकारः, दकारोपि ॥

मुखसुखार्थत्वस्याप्युभयत्रसाम्य-भा० अथमुखसुखार्थस्तकारः, दकारोपीति ॥

विचारान्तरप्रारम्भभाष्यम्— इदं विचार्यते-य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतय एतेषामवयवग्रहणेन ग्रहणं स्याद्वा न वेति ॥

विचारणाकारणजिज्ञासाभाष्यम्—कुतः पुनरियं विचारणा ? ॥

विचारणाकारणनिरूपणभाष्यम्—इह हि समुदाया अप्युपदिश्यन्ते, अवयवा अपि। अभ्यन्तरश्च समुदायेऽवयवः। तद्यथा वृक्षः प्रचलन् सहावयवैः प्रचलति। तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा ॥

विशेषजिज्ञासाभाष्यम्— कश्चात्र विशेषः ? ॥

1—(१।१।१) २—(१।१।२) ३—(३।३।५७)

ग्रहणे प्रथमदोषनिरूपणभाष्यम्— * वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षरविधिप्रतिषेधः *

वार्तिकव्याख्याभाष्यम्— वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति। स प्रतिषेध्यः। अग्न इन्द्र, वायो उदकम्, 'अकः सवर्णे दीर्घः[1]' इति दीर्घत्वं प्राप्नोति॥

ग्रहणे द्वितीयदूषणवार्तिकम्— * दीर्घे ह्रस्वविधिप्रतिषेधः *

वार्तिकव्याख्याभाष्यम्— दीर्घह्रस्वाश्रयोविधिःप्राप्नोति,स प्रतिषेध्यः आलूय, प्रलूय 'ह्रस्वस्य पिति कृति तुक्[2]' इति तुक् प्राप्नोति॥

द्वितीयदूषणनिवारणभाष्यम्— नैष दोषः, आचार्यप्रवृत्तिर्ज्ञापयति न दीर्घे ह्रस्वाश्रयो विधि र्भवति-इति। यदयं दीर्घाच्छे तुकं[3] शास्ति॥

दूषणनिवारणज्ञापकताबाधकभाष्यम्।— नैतदस्ति ज्ञापकम्, अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्।

प्रयोजनजिज्ञासाभाष्यम्— किम्?।

प्रयोजननिरूपणभाष्यम्— 'पदान्ताद्वा[4]' इति विभाषां वक्ष्यामीति।

ज्ञापकतासाधकभाष्यम्— यत्तर्हि योगविभागं करोति। इतरथा हि 'दीर्घात्पदान्ताद्वा' इत्येव ब्रूयात्।

दूषणान्तरभाष्यम्— इह तर्हि—खट्वाभिः, मालाभिः 'अतो भिस ऐस्[5]', इत्यैस्भावः प्राप्नोति।

दूषणान्तरवारणभाष्यम्— तपरकरणसामर्थ्यान्न भविष्यति।

दूषणान्तरभाष्यम्— इह तर्हि—याता वाता "अतो लोप आर्धधातुके[6]" इत्यकारलोपः प्राप्नोति।

दूषणान्तरबाधकभाष्यम्— ननु चात्रापि तपरकरणसामर्थ्यादेव न भविष्यति।

दूषणान्तरसाधकभाष्यम्— अस्ति ह्यन्यत्तपरकरणे प्रयोजनम्।

प्रयोजनजिज्ञासाभाष्यम्— किम्?।

१—(६।१।१०१) २—(६।१।७१) ३—दीर्घात् ६।१।७५॥ ४—(६।१।७६) ५—(७।१।९) ६—(६।४।४८)

प्रयोजननिरूपणभाष्यम्— सर्वस्य लोपो माभूदिति ।

आक्षेपभाष्यम्— अथ क्रियमाणेपि तपरे परस्य लोपे कृते पूर्वस्य कस्मान्न भवति ? ।

आक्षेपसमाधानभाष्यम्— परलोपस्य स्थानिवद्भावादसिद्धत्वाच्च।

दूषणान्तरवारणभाष्यम्— एवं तर्ह्याचार्यप्रवृत्ति र्ज्ञापयति—'नाकारस्थस्याकारस्य लोपो भवती'ति । यदयम् 'आतोऽनुपसर्गे कः' इति ककारमनुबन्धं करोति ।

ज्ञापकताकारणजिज्ञासाभाष्यम्—कथं कृत्वा ज्ञापकम् ? ।

ज्ञापकताकारणनिरूपणभाष्यम्—कित्करणे एतत्प्रयोजनम्—किती[2]त्याकार लोपो यथा स्यादिति। यद्याकारस्थस्याकारस्य लोपः स्यात्, कित्करणमनर्थकं स्यात्। परस्याकारस्य लोपे कृते द्वयोरकारयोः पररूपे हि सिद्धं रूपं स्याद्—गोदः कम्बलद इति । पश्यति त्वाचार्यो—नाकारस्थस्याकारस्य लोपः स्यादिति अतः ककारमनुबन्धं करोति।

ज्ञापकताबाधकभाष्यम्— नैतदस्ति ज्ञापकम् । उत्तरार्थमेतत्स्यात् 'परिमृजापनुदोः'[3] इति ।

ज्ञापकान्तरभाष्यम्— यत्तर्हि 'गापोष्टक्'[4] इत्यनन्यार्थं ककारमनुबन्धं करोति ।

ग्रहणे तृतीयं दूषणवार्तिकम्— * एकवर्णवच्च *

वार्तिकव्याख्याभाष्यम्— एकवर्णवच्च दीर्घो भवतीति वक्तव्यम् ।

प्रयोजनजिज्ञासाभाष्यम्— किं प्रयोजनम् ? ।

प्रयोजनवर्णनभाष्यम्— वाचा तरतीति द्व्यज्लक्षणष्ठन्[5]माभूदिति। इह च वाचोनिमित्तम्, 'तस्य निमित्तं संयोगोत्पातौ'[6] इत्यनुवर्तमाने 'गोद्वयचः'[7] इतिद्व्यज्लक्षणो यन्मा भूदिति ।

१—(३ । २ । ३) २— आतो लोप इटि च ६ । ४ । ६४ ॥
३—(३ । २। ५.) ४—(३ । २ । ८)
५—नौद्व्यचष्ठन् ४ । ४ । ७ ॥ ६—(५ । १ । ३२)
७—गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ५ । १ । ३९ ॥

दूषणवारणभाष्यम्— अत्रापि गोनौग्रहणं ज्ञापकम्—'दीर्घाद्-
ध्यज्लक्षणो विधि र्न भवति'—इति ।

सर्वसाधारणपरिहारवर्णनभाष्यम्—अयं तु सर्वेषामेव परिहारः—

परिहारसाधकवार्तिकम्— *नाव्यपवृक्तस्यावयवे तद्विधि र्यथा
द्रव्येषु *

वार्तिकव्याख्याभाष्यम्— नाव्यपवृक्तस्यावयवस्यावयवाश्रयो वि-
धि र्भवति यथा द्रव्येषु । तद्यथा द्रव्येषु
'सप्तदश सामिधेन्यो भवन्ति' इति न
सप्तदशारत्निमात्रं काष्ठमग्नावभ्यादीयते।

परिहारोदाहरणबाधकभाष्यम्— विषम उपन्यास, प्रत्यृचं चैव हि तत्कर्म
चोद्यते । असंभवश्चाग्नौ वेद्यां च ॥

परिहारोदाहरणान्तरभाष्यम्— यथा तर्हि 'सप्तदश प्रादेशमात्रीराश्वत्थीः
समिधोऽभ्यादधीत' इति न सप्तदशप्रा-
देशमात्रं काष्ठमग्नावभ्याधीयते ॥

परिहारोदाहरणबाधकभाष्यम्—अत्रापि प्रतिप्रणवं चैतत्कर्म चोद्यते ।
तुल्यश्चासंभवोऽग्नौ वेद्यां च ॥

परिहारोदाहरणान्तरभाष्यम्— यथा तर्हि 'तैलं न विक्रेतव्यम्' 'मांसं
न विक्रेतव्यम्' इति व्यपवृक्तं च न
विक्रीयते, अव्यपवृक्तं-गावः सर्षपाश्च
विक्रीयन्ते ।

परिहारोदाहरणान्तरभाष्यम्— तथा 'लोमनखं स्पृष्ट्वा शौचं कर्तव्यम्'
इति व्यपवृक्तं स्पृष्ट्वा नियोगतः कर्त-
व्यम् । अव्यपवृक्ते कामचारः ॥

आक्षेपभाष्यम्— यत्र तर्हि व्यपवर्गोऽस्ति ।

व्यपवर्गदेशजिज्ञासाभाष्यम्— क्व च व्यपवर्गोऽस्ति ? ॥

व्यपवर्गदेशनिर्देशभाष्यम्— संध्यक्षरेषु ॥

संध्यक्षरे दोषवारणवार्तिकम्—* सन्ध्यक्षरेषु विवृतत्वात् *

वार्तिकव्याख्याभाष्यम्— यदत्रावर्णम्, विवृततरं तदन्यस्मादव-
र्णाद् । ये अपीवर्णोवर्णे, विवृततरे ते
अन्याभ्यामिवर्णोवर्णाभ्याम् ॥

अग्रहणपक्षमञ्जूरीकरणभाष्यम्– अथवा पुन र्न गृह्यन्ते ।

अग्रहणे प्रथमं दूषणवार्तिकम्— ॐ अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम् ॐ

वार्तिकव्याख्याभाष्यम्— अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्तव्यम् ।

नुड्विधौ दूषणनिरूपणभाष्यम्-'तस्मान्नुड् द्विहलः[1]' ऋकारे चेति वक्तव्यम् । इहापि यथा स्यात्–आनृधतुः, आनृधुरिति ।

ग्रहणपक्षेदूषणाभाववर्णनभाष्यम्-यस्य पुनर्गृह्यन्ते 'द्विहल' इत्येव तस्य सिद्धम् ॥

अग्रहणेपि दूषणबाधकभाष्यम्—यस्यापि न गृह्यन्ते, तस्याप्येष न दोषः द्विहल्ग्रहणं न करिष्यते । तस्मान्नुड् भवतीत्येव ॥

आक्षेपभाष्यम्— यदि न क्रियते, आटतुः, आटुरित्यत्रापि प्राप्नोति ॥

आक्षेपसमाधानभाष्यम्— अश्नोतिग्रहणं[2] नियमार्थं भविष्यति-अश्नोतेरेवावर्णोपधस्य, नान्यस्यावर्णोपधस्येति ॥ (नुड्विधि)

अग्रहणे लादेशे दूषणवर्णनभा०-लादेशे च ऋकारग्रहणं कर्तव्यम् । 'कृपो रो लः' ऋकारस्य चेति वक्तव्यम् । इहापि यथा स्यात्–क्लृप्तः क्लृप्तवानिति ।

ग्रहणे दूषणाभाववर्णनभा० — यस्य पुन र्गृह्यन्ते र इत्येव तस्य सिद्धम् ॥

अग्रहणेपि दूषणाभाववर्णनभा०-यस्यापि न गृह्यन्ते तस्याप्येष न दोषः ऋकारोप्यत्र निर्दिश्यते ॥

निर्देशजिज्ञासाभाष्यम्— कथम् ? ।

निर्देशनिरूपणभाष्यम्— अविभक्तिको निर्देशः कृप उः रः लः= 'कृपो रोल' इति ।

स्फोटाङ्गीकारेणदूषणाभाववर्णनभा०-अथवा उभयतः स्फोटमात्रं निर्दिश्यते रश्रुतेर्लश्रुतिर्भवतीति ॥ (लादेश)

अग्रहणे विनामेदूषणवर्णनभाष्यम्-विनामे ऋकारग्रहणं कर्तव्यम् । 'रषा-

---

१–(७।४।७१) २—अश्नोतेश्च ७।४।७२ ॥

2

भ्यां नोणः समानपदे' ऋकाराच्चेति वक्तव्यम् इहापि यथा स्यात्—मातॄणां पितॄणामिति ।

अग्रहणे दूषणाभाववर्णनभाष्यम्—यस्य पुन र्गृह्यन्ते रषाभ्यामित्येव तस्य सिद्धम् ।

दूषणसाधकभाष्यम्— न सिध्यति । यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति ।

दूषणबाधकभाष्यम्— मा भूदेवम् । अड्व्यवाये इत्येव सिद्धम् ।

दूषणसाधकभाष्यम्— न सिध्यति । वर्णैकदेशाः के वर्णग्रहणे गृह्यन्ते, ये व्यपवृक्ता अपि वर्णा भवन्ति यच्चापि रेफात्परं भक्तेः, न तत्कचिदपि व्यपवृक्तं दृश्यते ।

दूषणबाधकभाष्यम्— एवं तर्हि योगविभागः करिष्यते, 'रषाभ्यां नो णः समानपदे' ततः-'व्यवाये'[2] व्यवाये च रषाभ्यां नो णो भवतीति ।

ततः 'अट्कुप्वाङ्नुम्भिः'[3] इति ।

योगविभागप्रयोजनाजिज्ञासाभाष्यम्— इदमिदानीं किमर्थम् ? ।

प्रयोजनवर्णनभाष्यम्— नियमार्थम्—'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये, नान्यैः' इति ।

अग्रहणेऽपि दूषणाभाववर्णनभाष्यम्—यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । आचार्यप्रवृत्तिर्ज्ञापयति भवतिऋकारान्नो णत्वम् इति यदयं क्षुभ्नादिषु[1] नृनमनशब्दं पठति ।

ज्ञापकताबाधकभाष्यम्— नैतदस्ति ज्ञापकम् । वृद्ध्यर्थमेतत्स्यात् नार्नमनिः ।

ज्ञापकान्तरभाष्यम्— यत्तर्हि तृप्नोतिशब्दं पठति ।

प्रागुक्तज्ञापकस्यापि मञ्जूरीकरणभाष्यम्— यच्चापि नृनमनशब्दं पठति ।

ज्ञापकताबाधकस्मारणभाष्यम्— ननु चोक्तम्—वृद्ध्यर्थमेतत्स्यात् ।

१—(८ । ४ । १) २—(८ । ४ । २) ३—(८ । ४ । २)

१—क्षुभ्नादिषु च ८ । ४ । २६ ।

ज्ञापकतासाधकभाष्यम्— वहिरङ्गा वृद्धिरन्तरङ्गं णत्वम् । असिद्धं वहिरङ्गमन्तरङ्गे ।

अग्रहणे दूषणवारणान्तरभाष्यम्—अथवा उपरिष्टाद्योगविभागः करिष्यते 'ऋतः' नो णो भवति । ततः—'छन्दस्य वग्रहात्' ऋत इत्येव ।

अग्रहणे २यं सूत्रनिर्माणगौरववा० * लुप्तावैच इदुतौ [2] *

वार्तिके शेषपूर्तिभाष्यम्— एतच्च वक्तव्यम् ।

ग्रहणे दूषणाभाववर्णनभाष्यम्—यस्य पुनर्गृह्यन्ते गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचामित्येष प्लुत्या[3] तस्य सिद्धम् ।

अग्रहणेऽपि दूषणाभाववर्णनभा०—यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । क्रियत एतन्न्यास एव ।

अग्रहणे ३यं दूषणवार्तिकम्— * तुल्यरूपे संयोगे द्विव्यञ्जनविधिः *

व्याख्याभाष्यम्— तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न सिध्यति—कुक्कुटः, पिप्पली, पित्तमिति ।

ग्रहणेदूषणाभाववर्णनभाष्यम्— यस्य पुनर्गृह्यन्ते तस्य द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ ।

ग्रहणेपिदूषणाभाववर्णनभा०— यस्यापि न गृह्यन्ते तस्यापि द्वौ ककारौ द्वौ पकारौ, द्वौ तकारौ ।

कारणजिज्ञासाभाष्यम्— कथम् ? ।

कारणनिरूपणभाष्यम्— मात्राकालोऽत्र गम्यते । न च मात्रिकं व्यञ्जनमस्ति । अनुपदिष्टं सत्कथं शक्यं विज्ञातुम् । असच्च कथं शक्यं प्रतिपत्तुम् ।

आक्षेपभाष्यम्— यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रैतन्नास्ति—'अण् सवर्णान् गृह्णाती'ति । इह तु कथम्—सय्ँयन्ता, सव्ँवत्सरः । यल्ँलोकम् , तल्ँलोकमिति । यत्रैतदस्त्यण् सवर्णान् गृह्णातीति ।

समाधानभाष्यम्— अत्रापि मात्राकालो गृह्यते । न च मा-

१—छन्दस्यृदवग्रहात् ८ । ४ । २६ । २—(८ । २ । १०६)
३—(८ । २ । ८६)

त्रिकं व्यञ्जनमास्ति । अनुपदिष्टं सत्कथं शक्यं विज्ञातुम् । असच्च कथं शक्यं प्रतिपत्तुम् ॥ ४ ॥

प्रत्याहारसूत्रम्— हयवरट् ॥ ५ ॥

हकारस्य द्विरुपदेशे विशेषजिज्ञासाभाष्यम्— सर्वे वर्णाः सकृदुपदिष्टाः, अयं हकारो द्विरुपदिश्यते–पूर्वश्चैव परश्च । यदि पुनः पूर्व एवोपदिश्येत, पर एव वा ; कश्चात्र विशेषः ? ॥

परोपदेशे प्रथमं दूषणवार्तिकम्– * हकारस्य परोपदेशे ऽड्ग्रहणेषु हग्रहणम् *

वार्तिकव्याख्याभाष्यम्— हकारस्य परोपदेशे ऽड्ग्रहणेषु हग्रहणं कर्तव्यम् 'आतोऽटि नित्यम्[1]' 'शश्छोऽटि[2]', 'दीर्घादटि समानपदे[3]' हकारे चेति वक्तव्यम् । इहापि यथा स्यात् । महाँ हि सः ॥

परोपदेशे द्वितीयदूषणवा०– * उत्त्वे च *

वार्तिकव्याख्याभाष्यम्— उत्त्वे च हकारग्रहणं कर्तव्यम् 'अतोरोरप्लुतादप्लुते[4]' 'हशि च[5]' हकारे चेति व्यम् । इहापि यथा स्यात्–पुरुषो हसति, ब्राह्मणो हसतीति ॥

पूर्वोपदेशमञ्जूरीकरणभाष्यम्– अस्तु तर्हि पूर्वोपदेशः ।

पूर्वोपदेशे प्रथमं दूषणवार्तिकम्– * पूर्वोपदेशे कित्त्वक्सेड्विधयो झल्ग्रहणानि च *

वार्तिकव्याख्याने पूर्वोपदेशे कित्त्वाप्राप्तिवर्णनभाष्यम् । यदि पूर्वोपदेशः कित्त्वं विधेयम्–स्निहित्वा स्नेहित्वा सिस्निहिषति सिस्नेहिषति 'रलो व्युपधाद्धलादेः[6]' इति कित्त्वं न प्राप्नोति ॥

पूर्वोपदेशे क्सविधिवर्णनभाष्यम्- क्सविधिः–क्सश्च विधेयः–अधुक्षत् अलिक्षत् 'शल इगुपधादनिटः क्सः[7]' इति क्सो न प्राप्नोति ॥

१-(८ । ३ । ३) २-(८ । ४ । ६३) ३-(८ । ३ । ९) ४-(६ । १ । ११३) ५-(६ । १ । ११४) ६-(१ । २ । २६) ७-(३ । १ । ४५ ।)

पूर्वोपदेशे इडप्राप्तिवर्णनभाष्यम्-	इड्विधिः । इट् च विधेयः—रुदिहि[1] वलादिलक्षण इण् न प्राप्नोति ॥
वार्तिकशेषव्याख्यानभाष्यम्—	झल्ग्रहणानि च ।
जिज्ञासाभाष्यम्—	किम् ? ।
समाधानभाष्यम्—	अहकाराणि स्युः ।
दोषजिज्ञासाभाष्यम्—	तत्र को दोषः ? ।
दोषवर्णनभाष्यम्—	'झलोझलि[2]' इतीह न स्यात्–अदाग्धाम् अदाग्धम् ।
हकारोपदेशविचारोपसंहारभा०-	तस्मात्पूर्वश्चैवोपदेष्टव्यः परश्च । यदि च किंचिदन्यत्राप्युपदेशे प्रयोजनमस्ति तत्राप्युपदेशः कर्तव्यः ॥
रेफोपदेशे देशविचारभाष्यम्—	इदं विचार्यते—अयं रेफो यकारवकाराभ्यां पूर्व एवोपदिश्येत— हरयवट्' इति, पर एव वा यथा न्यासम् इति ।
विशेषजिज्ञासाभाष्यम्—	कश्चात्र विशेषः ? ।
परोपदेशे दूषणवार्तिकम्—	*रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः *
वार्तिकव्याख्याभाष्यम्—	रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः ।
अनुनासिकापत्तिवर्णनभाष्यम्—	अनुनासिकस्य—स्वर्नयति प्रातर्नयति । 'यरोऽनुनासिकेऽनुनासिको वा[3]' इत्यनुनासिकः प्राप्नोति ।
द्विर्वचनापत्तिवर्णनभाष्यम् —	द्विर्वचनस्य—मद्रह्रदः भद्रह्र्र्दः[4] 'यरः' इति द्विर्वचनं प्राप्नोति ।
परसवर्णापत्तिवर्णनभाष्यम् —	परसवर्णस्य–कुण्डरथेन । वनंरथेन 'अनुस्वारस्य ययि[5]'इति परसवर्णः प्राप्नोति ।
पूर्वोपदेशमञ्जूरीकरणभाष्यम्—	अस्तु तर्हि पूर्वोपदेशः ।
पूर्वोपदेशे दूषणवार्तिकम्—	* पूर्वोपदेशे किच्वप्रतिषेधो व्यलोपवचनं च *
वार्तिकव्याख्याभाष्ये किच्वापत्ति-	यदि पूर्वोपदेशः किच्वं प्रतिषेध्यम् ।

१–रुदादिभ्यःसार्वधातुके७।२।७६॥ २–(८।२।२६) ३–(८।४।४५)
४—अचो रहाभ्यां द्वे ८।४।४६॥ ५—(८।४।५८)

वर्णनभाष्यम् ।	देवित्वा दिदेविषति 'रलोव्युपधा[1]' दिति किस्वं प्राप्नोति ।
किस्वापत्तिनिवारणभाष्यम्—	नैष दोषः, नैवं विचार्यते—'रलः व्युपधाद्' इति ।
पदविभागजिज्ञासाभाष्यम्—	किं तर्हि ?।
पदविभागनिरूपणभाष्यम्—	"रलः अव् व्युपधाद्" इति ।
व्याख्याजिज्ञासाभाष्यम्—	किमिदम् अव् व्युपधाद् इति ।
व्याख्यानिरूपणभाष्यम्—	अवकारान्ताद्व्युपधाद्अव्व्युपधादिति
वार्तिकशेषप्रदर्शनभाष्यम्—	व्यलोपवचनं च ।
व्याख्याभाष्यम्—	व्योश्च लोपो वक्तव्यः । गौधेरः, पचेरन् यजेरन्, 'जीवेरदानुः'—जीरदानुः । वलीति[2] लोपो न प्राप्नोति ।
दोषनिराकरणभाष्यम्—	नैष दोषः, रेफोऽप्यत्र निर्दिश्यते—'लोपो व्यो र्वलि' इति रेफे च वलि चेति ।
पूर्वोपदेशेदोषाभावेऽपि परोपदेश-मञ्जूरीकरणभाष्यम् ।	अथवा पुनरस्तु परोपदेशः ।
परोपदेशे प्रागुक्तदोषस्मारणभाष्यम् ।	ननु चोक्तम् 'रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः' इति ।
दोषपरिहारभाष्यम्—	अनुनासिकपरसवर्णयोस्तावत्[3]प्रतिषेधो न वक्तव्यः, रेफोष्मणां सवर्णा न सन्ति ।
द्विर्वचनापत्तिनिवारणभाष्यम्—	द्विर्वचनेऽपि । नेमौ रहौ कार्यिणौ द्विर्वचनस्य ।
जिज्ञासाभाष्यम्—	किं तर्हि ?।
समाधानभाष्यम्—	निमित्तमिमौ रहौ द्विर्वचनस्य तद्यथा—'ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम्' इति । नेदानीं तौ भुञ्जाते।
अयोगवाहपदार्थजिज्ञासाभाष्यम्-	इदं विचार्यते—इमेऽयोगवाहा न कचि-

१—(१ । २ । २६)

२—लोपो व्योर्वलि ६ । १ । ६६ ॥

३—अनुनासिकवारणाय यथा सवर्णपदस्य अपेक्षालक्षणसंबन्धमाश्रित्य विधेयविशेषणता अङ्गीकृता एवं 'स्पर्शोपञ्चमः' इति प्रातिशाख्यसंवादेन 'झय्' पदस्य अपेक्षालक्षणसंबन्धमाश्रित्य स्थानिविशेषणत्वेनापि अनुनासिकवारणं संभवति तथापि एकेनोपायेन कार्यसिद्धौ उपायान्तराश्रयणं व्यर्थमित्यभिप्रायेण भाष्यकृता नोक्तः ।

	दुपदिश्यन्ते, श्रूयन्ते च । तेषां कार्यार्थ उपदेशः कर्तव्यः ।
अयोगवाहपदार्थजिज्ञासाभा०—	के पुनरयोगवाहाः ? ।
अयोगवाहनिरूपणभाष्यम्—	विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्ययमाः[1] ।
नामार्थसमन्वयजिज्ञासाभाष्यम्—	कथं पुनरयोगवाहाः ? ।
योगसमन्वयभाष्यम्—	यदयुक्ता वहन्ति, अनुपदिष्टाश्च श्रूयन्ते
उपदेशस्थलजिज्ञासाभाष्यम्—	क पुनरेषामुपदेशः कर्तव्यः ? ।
स्थलनिरूपणवार्तिकम्—	* अयोगवाहानमट्सु णत्वम् *
व्याख्याभाष्यम्—	अयोगवाहानामट्सूपदेशः कर्तव्यः ।
प्रयोजनजिज्ञासाभाष्यम्—	किम् प्रयोजनम् ? ।
प्रयोजनवर्णनभाष्यम्—	णत्वम् । उरःकेण, उरᳲकेण, उरःपेण, उरᳲपेण 'अड्व्यवाये'[2] । इति णत्वं सिद्धं भवति ।
स्थलान्तरोपदेशवार्तिकम्—	* शर्षु जश्भावषत्वे *
व्याख्याभाष्यम्—	शर्षूपदेशः कर्तव्यः ।
प्रयोजनजिज्ञासाभाष्यम्—	किं प्रयोजनम् ? ।
प्रयोजननिरूपणभाष्यम्—	जश्भावषत्वे । अयमुब्जिरुपध्मानीयोपधः पठ्यते, तस्य जश्त्वे कृते उब्जिता उब्जितुमित्येतद्रूपं[3] यथा स्यात् ।
प्रयोजनबाधकभाष्यम्—	यद्युब्जिरुपध्मानीयोपधः पठ्यते उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति ।
दकारोपधत्वे दूषणाभावभाष्यम्-	दकारोपधे पुनर् 'नन्द्राः संयोगादयः[4]' इति प्रतिषेधः सिद्धो भवति ।
दकारोपधत्वे रूपसिद्धिजिज्ञासाभाष्यम् ।	यदि दकारोपधः पठ्यते, का रूपसिद्धिः, उब्जिता उब्जितुमिति ? ।
रूपसिद्धिनिरूपणभाष्यवार्तिकम्-	* असिद्धं भ उद्जेः *

१—तथा च शुक्लयजुःप्रातिशाख्ये—अथायोगवाहाः; ᳲक इति जिह्वामूलीयः; ᳲप इत्युपद्ध्मानीयः; अं इत्यनुस्वारः; अः इति विसर्जनीयः; हुँ इति नासिक्यः; कुँ खुँ गुँ घुँ इति यमाः (अ ८ सू० ८—१४) ।

२—अट्कुप्वाङ्नुम् व्यवायेपि ८ । ४ । २ ॥

३—झलां जश् झशि ८ । ४ । ५३ ॥ ४—(६ । १ । ३)

व्याख्याभाष्यम्— इदमस्ति—'स्तोश्चुनाश्चुः[1]' इति ततो वक्ष्यामि'भ उद्जेः'उद्जेःश्चुना सन्निपाते भो भवतीति ।

वाक्यरचने गौरवभाष्यम्— तत् तर्हि वक्तव्यम् ? ।

वाक्यारचने लाघवभाष्यम्— न वक्तव्यम् । निपातनादेवसिद्धम् ।

निपातनजिज्ञासाभाष्यम्— किं निपातनम् ? ।

निपातननिरूपणभाष्यम्— 'भुजन्युब्जौपाण्युपतापयोः '[2] इति ।

निपातने बाधकभाष्यम्— इहापि तर्हि प्राप्नोति—अभ्युद्गः समुद्गः इति ।

निपातने साधकभाष्यम्— अकुत्वविषये तन्निपातनम् ।

निपातनसाधकान्तरभाष्यम्—अथवा नैतदुब्जेरूपम् गमेरेतद् द्व्युपसर्गाड्डो विधीयते । अभ्युद्गतोऽभ्युद्गः, समुद्गतः समुद्गः इति ।

शर्षुपाठे षत्वसिद्धिप्रयोजनभा० षत्वं च प्रयोजनम् । सर्पिःषु धनुःषु । 'शर्व्यवाये' । इति षत्वं सिद्धं भवतीति

विसर्जनीयपदाकरणलाघवभा०– 'नुम्विसर्जनीयशर्व्यवायेऽपि'[3] इति विसर्जनीयग्रहणं न कर्तव्यं भवति ।

नुम्ग्रहणाकरणलाघवभाष्यम्— नुमश्चापि तर्हि ग्रहणं शक्यमकर्तुम् ।

रूपसिद्धिप्रकारजिज्ञासाभष्यम्– कथं, सर्पीषि धनूंषि ? ।

रूपसिद्धिप्रकारनिरूपणभाष्यम्- अनुस्वारे कृते 'शर्व्यवाये' इत्येव सिद्धम् ।

नुम्ग्रहणावश्यकताभाष्यम्— अवश्यं नुमो ग्रहणं कर्तव्यम् । अनुस्वारविशेषणं नुम्ग्रहणम्, नुमो योऽनुस्वारस्तत्र यथास्यात् ,इह मा भूत्–पुंस्विाते ।

अविशेषेणोपदेशभाष्यम्— अथवाविशेषेणोपदेशः कर्तव्यः ।

प्रयोजनजिज्ञासाभाष्यम्— किं प्रयोजनम् ? ।

अविशेषेणोपदेशप्रयोजनवार्तिकम् ॐ अविशेषेण संयोगोपधासंज्ञाऽलोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः ॐ

व्याख्याभाष्ये संज्ञाप्रयोजननिरूपणभाष्यम्— अविशेषेण संयोगसंज्ञा प्रयोजनम्, उञ्जक, 'हलोनन्तराः संयोगः[4]' इति

१—(८ । ४ । ४०) २—(७ । ३ । ६१) ३—(८ । ३ । ५८) ४—(१ । १ । ७)

संयोगसंज्ञा 'संयोगेगुर्वि'[1] 'ति गुरुसंज्ञा 'गुरोरिति' प्लुतो भवति।

उपधासंज्ञाप्रयोजननिरूपण-भाष्यम्। — उपधासंज्ञा च प्रयोजनम्[3] —दुष्कृतं, निष्कृतम्, दुष्पीतं, निष्पीतम् 'इदुदुपधस्य चाप्रत्ययस्येति'[4] षत्वं सिद्धं भवति।

उपधासंज्ञाप्रयोजननिराकरण-भाष्यम्। — नैतदस्ति प्रयोजनम्। न 'इदुदुपध' ग्रहणेन विसर्जनीयो विशेष्यते।

विशेष्यजिज्ञासाभाष्यम्— किं तर्हि?।

विशेष्यनिरूपणभाष्यम्— सकारो विशेष्यते-'इदुदुपधस्य सकारस्य यो विसर्जनीयः' इति।

प्रकारान्तरभाष्यम्— अथवोपधाग्रहणं न करिष्यते, इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः—इदुद्भ्यामुत्तरस्य विसर्जनीयस्येति।

अलोन्त्यविधिप्रयोजननिरूपण-भाष्यम्। —अलोन्त्यविधिश्च प्रयोजनम्—वृक्षस्तरति प्लक्षस्तरति 'अलोन्त्यस्य'[5] विधयो भवन्तीत्यलोन्त्यस्य सत्वं[6] सिद्धं भवति।

अलोन्त्यविधिप्रयोजननिराकरण-भाष्यम् —एतदपि नास्ति प्रयोजनम्—"निर्दिश्यमानस्यादेशा भवन्ति" इति विसर्जनीयस्यैव भविष्यति।

द्विर्वचनप्रयोजनोपपादनभाष्यम्— द्विर्वचनं च प्रयोजनम्[7] —(उर ××कः: उर

१—(१ । ४ । ११) २—(८ । २ । ८६)

३—अलोन्त्यात्पूर्व उपधा १ । १ । ६५ ॥ ४—(८ । ३ । ४१)

५—(१ । १ । ६५) । ६—विसर्जनीयस्य सः ८ । ३ । ३४ ॥

७—अयं च भाष्यग्रन्थः केनचित् विकारितो भवेत् 'न विसर्जनीयः' (३ । २९) इति अथर्वप्रातिशाख्ये 'अथ न' (१४ । १४) 'अवसाने र विसर्जनीयजिह्वामूलीयोपध्मानीयाः' (१४ । १५) इति सूत्रेण तैत्तिरीयप्रातिशाख्ये च द्वित्वनिषेधस्य स्पष्टमभिधानात्। किन्तु 'जिह्वामूलीयोपध्मानीयाभ्यां च' (४ । १०३) इति वाजसनेयिप्रातिशाख्यानुसारेण 'मयि व ÷ क्कामधरणम्' (वा. सं. ३ । २७) 'तत ÷ क्खनेम' (वा. सं. ११ । २२) इत्यादौ ताभ्यां परस्यैव द्वित्वविधानं वार्तिककाराभिप्रेतं मन्तव्यम्। एवं च अट्सु पाठस्यैव द्वित्वं प्रयोजनम् शर्षु पाठस्य तु जश्भावप्रयोजनप्रत्याख्यानवत् द्वित्वप्रयोजनप्रत्याख्यानमपि भाष्यकृता लिखितं त्रुटितं भवेत्।

ऽऽपः:)। 'अनाचि च[1]' अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवति ।

स्थानिवद्भावप्रतिषेधप्रयोजनोपपादनभाष्यम् ।

स्थानिवद्भावप्रतिषेधश्च प्रयोजनम्—यथेह भवति-उरःकेण, उरःपेणेति 'अड्व्यवाय[2]' इति णत्वम्, एवमिहापि स्थानिवद्भावात्प्राप्नोति—व्यूढोरस्केन महोरस्केनेति । तत्र 'अनल्विधौ[3]' इति प्रतिषेधः सिद्धो भवति ।

वर्णानाम् अर्थवत्त्वानर्थकत्वजिज्ञासाभाष्यम् ।

किं पुनरिमे वर्णा अर्थवन्तः,आहोस्विदनर्थकाः ?।

अर्थवत्त्वसाधकवार्तिकम्—

* अर्थवन्तोवर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् *

व्याख्याभाष्यम्—

अर्थवन्तो वर्णाः ।

हेतुजिज्ञासाभाष्यम्—

कुतः ?।

हेतुनिरूपणभाष्यम्—

धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् ।

एकवर्णधातूदाहरणभाष्यम्—

धातव एकवर्णा अर्थवन्तो दृश्यन्ते—ऐति, अध्येति, अधीन इति ।

एकवर्णप्रातिपदिकोदाहरणभा०—

प्रातिपदिकान्येकवर्णान्यर्थवन्ति —आभ्याम्, एभिः, एषु ।

एकवर्णप्रत्ययोदाहरणभाष्यम्—

प्रत्यया एकवर्णा अर्थवन्त—औपगवः, कापटवः ।

एकवर्णनिपातोदाहरणभाष्यम्—

निपाता एकवर्णा अर्थवन्तः—अ अपेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, अ अपक्राम ।

उपसंहारभाष्यम्—

धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे—अर्थवन्तो वर्णा इति ।

अर्थवत्त्वसाधकं द्वितीयं वार्तिकम्-

* वर्णव्यत्यये चार्थान्तरगमनात् *

व्याख्याभाष्यम्—

वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहेऽर्थवन्तोवर्णा इति । कूपः सूपो यूपः

१—(८।४।४७।) २—(८।४।२।) ३—(१।१।४६॥)

इति। कूप इति सककारेण कश्चिदर्थो गम्यते। सूप इति ककारापाये सकारोपजने चार्थान्तरं गम्यते। यूप इति ककारसकारापाये यकारोपजने चार्थान्तरं गम्यते। ते मन्यामहे—यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति।

अर्थवत्त्वसाधकं तृतीयंवार्तिकम्- ※ वर्णानुपलब्धौ चानर्थगतेः ※

व्याख्याभाष्यम्— वर्णानुपलब्धौ चानर्थगते र्मन्यामहेऽर्थवन्तो वर्णा इति वृक्ष ऋक्षः, काण्डीर, आण्डीरः। वृक्ष इति सवकारेण कश्चिदर्थो गम्यते, ऋक्ष इति वकारापाये सोऽर्थो न गम्यते। काण्डीर इति सककारेण कश्चिदर्थो गम्यते, आण्डीर इति ककारापाये सोऽर्थो न गम्यते।

'अनर्थगतेः' इत्येतदर्थजिज्ञासा- किं तर्ह्युच्यते—'अनर्थगतेः' इति। न

भाष्यम्। साधीयो ह्यत्रार्थस्य गति र्भवति।

वार्तिकेपठनीयपाठनिरूपणभाष्यम्। — एवं तर्हीदं पठितव्यं स्यात् 'वर्णानुपलब्धौचातदर्थगतेः' इति।

अर्थजिज्ञासाभाष्यम्— किमिदम्—अतदर्थगतेरिति?

अर्थनिरूपणभाष्यम्— तस्यार्थस्तदर्थः, तदर्थस्य गतिस्तदर्थगतिः। न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति। अथवा सोऽर्थस्तदर्थस्तदर्थस्य गतिस्तदर्थगति र्न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति।

वार्तिकपाठपरिवर्तनकरणाक्षेप भाष्यम्। स तर्हि तथा निर्देशः कर्तव्यः?।

पाठपरिवर्तनाकरणभाष्यम्— न कर्तव्यः। उत्तरपदलोपोत्र द्रष्टव्यः। तद्यथा—उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः। एवमतदर्थगतेरनर्थगतेरिति।

अर्थवत्त्वसाधकं चतुर्थं वार्तिकम्-※ संघातार्थवत्त्वाच्च ※

व्याख्याभाष्यम्— संघातार्थवत्त्वाच्च मन्यामहे 'अर्थवन्तो वर्णा' इति येषां संघाता अर्थवन्तः अवयवा अपि तेषामर्थवन्तः ॥ (येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः) तद्यथा—एकश्चक्षुष्मान्दर्शने समर्थः तत्समुदायश्च शतमपि समर्थम्, एकश्च तिलस्तैलदाने समर्थः तत्समुदायश्च खार्यपि तैलदाने समर्था।
येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। तद्यथा—एकोन्धो दर्शनेऽसमर्थस्तत्समुदायश्च शतमप्यसमर्थम् एका च सिकता तैलदानेऽसमर्था तत्समुदायश्च खारीशतमप्यसमर्थम्।

अर्थवत्त्वे दूषणभाष्यम्— यदि तर्हीमे वर्णा अर्थवन्तः। अर्थवत्कृतानि प्राप्नुवन्ति।

जिज्ञासाभाष्यम्— कानि ?।

कार्यनिरूपणभाष्यम्— 'अर्थवत्प्रातिपदिकम्[1]' इति प्रातिपदिक संज्ञा, 'प्रातिपदिकात्[2]' इति स्वाद्युत्पत्तिः' 'सुबन्तं पदम्[3]' इति पदसंज्ञा।

दोषजिज्ञासाभाष्यम्— तत्र को दोषः ?।

दोषनिरूपणभाष्यम्— 'पदस्य[4]' इति न लोपादीनि प्राप्नुवन्ति—धनं वनमिति।

अर्थवत्त्वे दूषणनिराकरणवार्तिकम्- ॥ संघातस्यैकार्थ्यात्सुबभावो वर्णात् ॥

व्याख्याभाष्यम्— संघातस्यैकत्वमर्थः। तेन वर्णात्सुबुत्पत्ति र्न भविष्यति।

अनर्थकत्वसाधकं प्रथमंवार्तिकम्- ॥अनर्थकास्तुप्रतिवर्णमर्थानुपलब्धेः॥

व्याख्याभाष्यम्— अनर्थकास्तु वर्णाः ॥

हेतुजिज्ञासाभाष्यम्— कुतः ?।

हेतुनिरूपणभाष्यम्— प्रतिवर्णमर्थानुपलब्धेः। नहि प्रतिवर्ण-

१—(१।२।४५) २—(४।१।१) ३—(१।४।१४)
४—न लोपः प्रातिपदिकान्तस्य ८।२।७॥

मर्था उपलभ्यन्ते ।

प्रतिवर्णपदविग्रहजिज्ञासाभा०– किमिदं प्रतिवर्णमिति ? ।

विग्रहनिरूपणभाष्यम्— वर्णं वर्णं प्रति प्रतिवर्णम् ।

अनर्थकत्वसाधकं द्वितीयंवार्तिकम् * वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात् *

व्याख्याभाष्यम्— वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्मन्यामहे—अनर्थका वर्णा 'इति ।

वर्णव्यत्ययोदाहरणभाष्यम्— वर्णव्यत्यये–कृतेस्तर्कः, कसेः सिकताः, हिंसेः सिंहः । वर्णव्यत्ययो नार्थव्यत्ययः ।

अपायोदाहरणभाष्यम्— अपायो लोपः–हतः, घ्नन्ति, घ्नन्तु, अघ्नन् वर्णापायोनार्थापायः ।

उपजनोदाहरणभाष्यम्— उपजन आगमः—लविता, लवितुम् । वर्णोपजनो नार्थोपजनः ।

विकारोदाहरणभाष्यम्— विकार आदेशः—घातयति घातकः । वर्णविकारो नार्थविकारः ॥

वार्तिकोपसंहारभाष्यम्— यथैव वर्णव्यत्ययापायोपजनविकारा भवन्ति तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यम् । न चेह तद्वद् । अतो मन्यामहे—'अनर्थका वर्णा' इति ।

उभयपक्षयोर्न्याय्यत्वजिज्ञासाभाष्यम् ।—उभयमिदं वर्णेषूक्तम्–अर्थवन्तोऽनर्थका इति च । किमत्र न्याय्यम् ।

सिद्धान्तसमाधानभाष्यम्— उभयमित्याह ॥

हेतुजिज्ञासाभाष्यम्— कुतः ? ॥

हेतुनिरूपणभाष्यम्— स्वभावतः । तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थै र्युज्यन्ते, अपरे न । न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम, कश्चिद्वाऽनर्थक इति कृत्वा सर्वैरनर्थकैः । तत्र किमस्माभिः शक्यं कर्तुम्–यद्धातुप्रातिपदिकप्रत्ययनिपाता एकवर्णा अर्थवन्तोऽतोऽन्येऽनर्थका इति । स्वाभाविकमेतत् ॥

अर्थवत्त्वसाधकवार्तिकसमन्वयजि-कथं य एष भवता वर्णानामर्थवत्तायां

[जिज्ञ]ासाभाष्यम्—	हेतुरुपदिष्टः—'अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेःसंघातार्थवत्त्वाच्च इति?
सिद्धान्तसमाधानभाष्यम्—	संघातान्तराण्येवैतान्येवंजातीयकानि अर्थान्तरेषु वर्तन्ते—कूपः सूपो यूप इति।
वर्णव्यत्ययादिकल्पने दूषणभाष्यम्।	यदि हि वर्णव्ययकृतमर्थान्तरगमनंस्यात्, भूयिष्ठः कूपार्थः सूपे स्यात्, सूपार्थश्च कूपे, कूपार्थश्च यूपे। यूपार्थश्च कूपे, सूपार्थश्च यूपे यूपार्थश्च सूपे; यस्तु खलु न किंचित्सूपस्य वा यूपे, यूपस्य वा कूपे, कूपस्य वा यूपे, सूपस्य वा कूपे, कूपस्य वा सूपे, यूपस्य वा सूपे अतो मन्यामहे—संघातान्तराण्येतान्येवंजातीयकान्यर्थान्तरेषु वर्तन्त इति ॥
अर्थवत्त्वसाधनेऽनर्थकत्वापत्तिभाष्यम्।	इदं खल्वपि—भवता वर्णानामर्थवत्तां ब्रुवता साधीयोऽनर्थकत्वं द्योतितम्। यो हि मन्यते—यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति। ऊपशब्दस्त्वस्यानर्थकः स्यात् ॥
अत्रापरिहृतस्य हेतोरग्रेपरिहार—	तत्रेदमपरिहृतम्—संघातार्थवत्त्वाच्च इति
वक्ष्यमाणतानिरूपणभाष्यम्।	एतस्यापि प्रातिपदिकसंज्ञायां परिहारं[1] वक्ष्यति ॥
प्रत्याहारेष्वितां ग्रहणाभावनिरूपणम् भाष्यम्।	अइउण् ऋलृक् एओङ् ऐऔच्।
हेतुजिज्ञासावार्तिकम्—	* प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न *
व्याख्याभाष्यम्—	य एतेऽक्षु प्रत्याहारार्था अनुबन्धाः क्रिय-

1—अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५।

न्ते, एतेषामज्ग्रहणेन ग्रहणं कस्मान्न भवति ? ।

दूषणजिज्ञासाभाष्यम्—	किं च स्यात् ? ।
दूषणनिरूपणभाष्यम्—	दधि णकारीयति, मधु णकारीयति, 'इकोयणचि[1]' इति यणादेशः प्रसज्येत ।
अग्रहणे प्रथमं हेतुवार्तिकम्—	ॐ आचारात् ॐ
पदार्थजिज्ञासाभाष्यम्—	किमिदमाचारादिति ? ।
पदार्थनिरूपणभाष्यम्—	आचार्याणामुपचारात् । नैतेष्वाचार्या अच्कार्याणि कृतवन्तः ।
अग्रहणे द्वितीयं हेतुवार्तिकम्—	ॐ अप्रधानत्वात् ॐ
व्याख्याभाष्यम्—	अप्रधानत्वाच्च । न खल्वेतेषामक्षु प्राधान्येनोपदेशः क्रियते ।
प्रधानतादेशजिज्ञासाभाष्यम्—	क्व तर्हि ? ।
प्राधान्यदेशनिरूपणम्—	हल्षु ।
कारणजिज्ञासाभाष्यम्—	कुत एतत् ? ।
कारणनिरूपणभाष्यम्—	एषा ह्याचार्यस्य शैली लक्ष्यते—यत्तुल्यजातीयाँस्तुल्यजातीयेषूपदिशति--अचोऽक्षु हलो हल्षु ।
अग्रहणे तृतीयं हेतुवार्तिकम्—	ॐ लोपश्चबलवत्तरः ॐ
व्याख्याभाष्यम्—	लोपः खल्वपि तावद्भवति ।
अग्रहणे आचार्यान्तरीयं हेतुश्लोकवार्तिकम् ।	ॐ ऊकालोजिति वा योगस्तत्कालानां यथा भवेत् । अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति ॐ
व्याख्याभाष्यम्—	अथवा योगविभागः करिष्यते—'ऊकालोऽच्[2]' उ ऊ उ३ इत्येवं कालोऽज्भवति । ततो 'ह्रस्वदीर्घप्लुतः[3]' ह्रस्वदीर्घप्लुतसंज्ञश्च भवति—ऊकालोच् ।
आक्षेपभाष्यम्—	एवमपि कुक्कुट इत्यत्रापि प्राप्नोति ।
सिद्धान्तसमाधानभाष्यम्—	तस्मात्पूर्वोक्त एव परिहारः ।

१—(६ । १ । ७७) २—(१ । २ । २७) ३—(१ । २ । २७)

अग्रहणे आचार्यान्तरीयहेतुवार्तिकावतरणभाष्यम् ।	एष एवार्थः । अपर आह—
अग्रहणहेतुमुन्यन्तरीयश्लोकवार्तिकम् ।	ह्रस्वादीनां वचनात् प्राग्यावत्तावदेव योगोस्तु । अच्कार्याणि यथा स्युस्तत्कालेष्वक्षु कार्याणि ॥
अन्तस्थानामणसूपदेशप्रयोजनजिज्ञासाभाष्यम् ।	अथ किमर्थमन्तस्थानामणसूपदेशः क्रियते ? ।
प्रयोजननिरूपणभाष्यम्—	इह सय्ँय्ँयन्ता सव्ँव्ँवत्सरः यल्ँल्ँलोकं तल्ँल्ँलोकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव[1] द्विर्वचनम् । तत्र परस्य परसवर्णे कृते तस्य यय्ग्रहणेन ग्रहणात् पूर्वस्यापि परसवर्णो यथा स्यात् ।
प्रयोजननिरूपणभाष्यम्--	नैतदस्ति प्रयोजनम् । वक्ष्यत्येतत्—द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम्[2] इति । यावता सिद्धत्वमुच्यते परसवर्ण एव तावद्भवति ।
प्रयोजननिदर्शनभाष्यम्—	परसवर्णे तर्हि कृते तस्य यग्रहणेन ग्रहणाद् द्विर्वचनं यथा स्यात् ।
प्रयोजनबाधकभाष्यम्—	माभूद् द्विर्वचनम् ।
प्रयोजनसाधकभाष्यम्—	ननु च भेदो भवति—सति द्विर्वचने त्रियकारकम्, असति द्विर्वचने द्वियकारकम् ।
प्रयोजनवाधकभाष्यम्—	नास्ति भेदः । सत्यपि द्विर्वचने द्वियकारकमेव ।
कारणजिज्ञासाभाष्यम्—	कथम् ? ।
कारणनिरूपणभाष्यम्—	'हलो यमां यमि लोपः'[3] इत्येवमेकस्य लोपेन भवितव्यम् ।
प्रयोजनसाधकभाष्यम्—	एवमपि भेदः । सति द्विर्वचने कदाचिद् द्वियकारकम्, कदाचित् त्रियकारकम् । असति द्वियकारकमेव ।

१—वा पदान्तस्य ८ । ४ । ५९ ॥ अनचि च ८ । ४ । ४७ ॥
२—स्वरितो वानुदात्ते पदादौ (८ । २ । ६ वा०) ३—(८ । ४ । ६४)

प्रयोजनवाधकहेतुजिज्ञासाभा०–स एष कथं भेदो न स्यात् ?।

हेतुनिरूपणभाष्यम्— यदि नित्यो लोपः स्यात् । विभाषा च स लोपः।

अभेदहेतुस्वीकारभाष्यम्— यथाऽभेदस्तथास्तु।

प्रयोजनसाधकहेतुवार्तिकम्— *अनुवर्तते विभाषा शरोऽचि यद्वारयत्ययं द्वित्वम् *

व्याख्याभाष्यम्— यदयं 'शरोचि'[1] इतिद्विर्वचनप्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यो—ऽनुवर्तते विभाषेति।

ज्ञापकताकारणजिज्ञासाभाष्यम्–कथं कृत्वा ज्ञापकम् ?।

कारणनिरूपणवार्तिकम्— * नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित्स्यात् *

व्याख्याभाष्यम्— यदि नित्यो लोपः स्यात्, प्रतिषेधवचन मनर्थकं स्यात्। अस्त्वत्र द्विर्वनम्, 'झरो- झरि सवर्णे[2]' इति लोपो भविष्यति। पश्यति त्वाचार्यः—विभाषा सलोप इति ततो द्विर्वचनप्रतिषेधं शास्ति।

ज्ञापकतावाधकभाष्यम्— नैतदस्तिज्ञापकम्। नित्येपि तस्य लोपे स प्रतिषेधोऽवश्यं वक्तव्यः। यदेतद् 'अचोरहाभ्याम्[3] इति द्विर्वचनं लोपापवादः स विज्ञायते।

लोपापवादताकारणजिज्ञासाभा० कथम् ?।

कारणानिरूपणभाष्यम्— यर इत्युच्यते। एतावन्तश्च यरः। यदुत झरो वा यमो वा। यदि चात्र लोपः स्याद्द्विर्वचनमनर्थकं स्यात्।

लोपसूत्रोदाहरणजिज्ञासाभाष्यम्-किं तर्हि तयो र्योगयोरुदाहरणम् ?।

उदाहरणनिरूपणभाष्यम्— यदकृते द्विर्वचने त्रिव्यञ्जनः संयोगः— प्रत्तम्, अवत्तम्, आदित्यः।

ज्ञापकतावाधकभाष्यम्— इहेदानीं कर्त्ता हर्त्तेति द्विर्वचनसामर्थ्या लोपो न भवति। एवमिहापि लोपो न

1—(८।४।४९) 2—(८।४।६५) 3—(८।४।४६)

स्यात्—कर्षति वर्षतीति । तस्मान्नित्येपि लोपेऽवश्यं स प्रतिषेधो वक्तव्यः ।

संदेहोपसंहारभाष्यम्— तदेतदत्यन्तं संदिग्धं वर्त्तते–आचार्याणां विभाषानुवर्त्तते न वेति ॥ ५ ॥

प्रत्याहारसूत्रम्— लण् ॥ ६ ॥

णकारस्य द्विरनुबन्धत्वे संदेहभाष्यम्— अयं णकारो द्विरनुबध्यते-पूर्वश्चैव परश्च तत्राणग्रहणेष्विणग्रहणेषु च संदेहो भवति पूर्वेण वा स्युः, परेण वेति ।

संदेहस्थलजिज्ञासा भाष्यम्— कतमस्मिंस्तावदण्ग्रहणे संदेहः ? ॥

प्रथमसंदेहस्थलनिरूपणभाष्यम्· " ढ्लोपे पूर्वस्य दीर्घोऽणः[1] इति ।

संदेहाभाववार्तिकम्— * (असंदिग्धम्) *

व्याख्याभाष्यम्— असंदिग्धम्-पूर्वेण न परेण ।

असंदेहहेतुजिज्ञासाभाष्यम्— कुत एतत् ? ।

असंदेहहेतुनिरूपणवार्तिकम् * पराभावात् *

व्याख्याभाष्यम् — नहि ढ्लोपे परेऽणः सन्ति ।

हेतुबाधकभाष्यम्— ननु चायमस्ति–आतृढ आवृढ इति ।

सिद्धान्तसमाधानभाष्यम्— एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण । यदिहिपरेण स्यादण्ग्रहणमनर्थकं स्यात् ' ढ्लोपे पूर्वस्य दीर्घोऽचः 'इत्येव ब्रूयात् ।

सिद्धान्तिसमाधाने लाघवभाष्यम्- अथवैतदपि न ब्रूयाद् अचो ह्येतद् भवति–ह्रस्वो दीर्घः प्लुत इति ।

द्वितीयसंदेहस्थलभाष्यम्— अस्मिंस्तर्ह्यण्ग्रहण संदेहः—' केऽणः '[2] इति ।

संदेहाभावभाष्यम्— असंदिग्धं पूर्वेण, न परेण ।

हेतुजिज्ञासाभाष्यम्— कुत एतत् ? ।

हेतुनिरूपणवार्तिकम् — पराभावात् ।

व्याख्याभाष्यम्— नहि के परेऽणः सन्ति ।

हेतुबाधकभाष्यम्— ननु चायमस्ति–गोका नौकेति ।

सिद्धान्तिसमाधानभाष्यम्— एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण । यदि हि परेण स्यादण्ग्रहणमनर्थकं

1—(६ । ३ । १११) २—(७ । ४ । १३)

स्यात्। 'केऽचः' इत्येव ब्रूयात्।

सिद्धान्तिलाघवभाष्यम्— अथवैतदपि न ब्रूयात्। अचोह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति।

चतुर्थं संदेहस्थलभाष्यम्— अस्मिंस्तर्ह्यण्ग्रहणे संदेहः—'अणोऽप्रगृह्यस्यानुनासिकः'[1] इति।

संदेहाभावभाष्यम्— असंदिग्धं पूर्वेण, न परेण।

हेतुजिज्ञासाभाष्यम्— कुत एतत्?।

हेतुनिरूपणवार्तिकम्— *पराभावात्*

व्याख्याभाष्यम्— नहि पदान्ताः परेऽणः सन्ति।

हेतुबाधकभाष्यम्— ननुचायमस्ति–कर्तृ हर्तृ इति।

सिद्धान्तिसमाधानभाष्यम्— एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्याद्, अण्ग्रहणमनर्थकं स्याद् 'अचोऽप्रगृह्यस्यानुनासिकः' इत्येव ब्रूयात्।

सिद्धान्तिसमाधानलाघवभा० अथवैतदपि न ब्रूयात्, अच एव हि प्रगृह्या भवन्ति।

संदेहस्थलभाष्यम्— अस्मिंस्तर्ह्यण्ग्रहणे संदेहः–'उरण्रपरः'[2]

संदेहाभावभाष्यम्— असंदिग्धं पूर्वेण, न परेण।

हेतुजिज्ञासाभाष्यम्— कुत एतत्?।

हेतुनिरूपणवार्तिकम् – पराभावात्।

व्याख्याभाष्यम्— न ह्युः स्थाने परेऽणः सन्ति।

हेतुबाधकभाष्यम्— ननु चायमस्ति–कर्त्रर्थं हर्त्रर्थमिति।

दूषणजिज्ञासाभाष्यम्- किं च स्याद् यद्यत्र रपरत्वं स्यात्?॥

दूषणनिरूपणभाष्यम्— द्वयोरेफयोः श्रवणं प्रसज्येत॥

दूषणबाधकभाष्यम्— 'हलो यमां यमि लोपः'[3] इत्येवमेकस्यात्र लोपो भविष्यतीति॥

दूषणसाधकभाष्यम्— विभाषा स लोपः, विभाषाश्रवणं प्रसज्येत।

दूषणबाधकभाष्यम्— अयं तर्हि नित्यो लोपः 'रोरि'[4] इति॥

दूषणसाधकभाष्यम्— पदान्तस्येत्येवं सः।

१-(८।४।५७) २-(१।१।५१) ३-(८।४।६४) ४-(८।३।१४)

दूषणबाधकभाष्यम्— न शक्यः स पदान्तस्येत्येवं विज्ञातुम् । इह हि लोपो न स्यात्-जर्गृधेर्लङ् अजर्घाः पास्पर्द्धेः अपास्पाः इति ॥

दूषणनिरूपणभाष्यम्— इह तर्हि मातॄणां पितॄणामिति रपरत्वं प्रसज्येत ।

दूषणबाधकभाष्यम्— आचार्यप्रवृत्तिर्ज्ञापयति—नात्र रपरत्वं भवतीति । यदयम् 'ऋत इद्धातोः[1]' इति धातुग्रहणं करोति ।

ज्ञापकताहेतुजिज्ञासाभाष्यम्— कथं कृत्वा ज्ञापकम् ? ।

ज्ञापकतोपपादनभाष्यम्— धातुग्रहणस्यैतत्प्रयोजनम्-इह मा भूत् मातॄणां पितॄणामिति यदि चात्र रपरत्वं स्याद्धातुग्रहणमनर्थकं स्यात् । रपरत्वे कृते अनन्त्यत्वादित्वं न भविष्यति । पश्यतित्वाचार्यो-नात्र रपरत्वं भवतीति ततो धातुग्रहणं करोति ॥

ज्ञापकताबाधकभाष्यम्— इहापि तर्हि न प्राप्नोति-चिकीर्षति जिहीर्षतीति ॥

ज्ञापकतासाधकभाष्यम्— माभूदेवम् । 'उपधायाश्च[2]' इत्येवं भविष्यति ।

ज्ञापकताबाधकभाष्यम्— इहापि तर्हि प्राप्नोति-मातॄणां पितॄणामिति ॥

तस्मात्तत्र धातुग्रहणं कर्तव्यम् ॥

सिद्धान्तिसमाधानभाष्यम्— एवं तर्हि-सामर्थ्यात्पूर्वेण, न परेण । यदि परेण स्याद् अण्ग्रहणमनर्थकं स्यात् 'उरण्परः' इत्येव ब्रूयात् ॥

संदेहस्थलनिरूपणभाष्यम्— अस्मिँस्तर्ह्यण्ग्रहणे संदेहः—'अणुदित्सवर्णस्य चाप्रत्ययः[3]' इति ।

संदेहाभावभाष्यम्— असंदिग्धं परेण, न पूर्वेण ॥

हेतुजिज्ञासाभाष्यम्— कुत एतत् ? ।

हेतुज्ञापकवार्तिकम्— * सवर्णेऽण् तु परं ह्युर्कृत् *

व्याख्याभाष्यम्— यदयम् 'उर्ऋत्[4]' इत्यृकारे तपरकरणं

१-(७।१।१००) २-(७।१।१०१) ३-(१।१।६९) ४-(७।४।७)

करोति । तज्ज्ञापयत्याचार्यः—परेण, न पूर्वेणेति ॥

संदेहस्थलभाष्यम्— इण्ग्रहणेषु तर्हि संदेहः ॥

संदेहाभावभाष्यम्— असंदिग्धं परेण, न पूर्वेण ॥

हेतुजिज्ञासाभाष्यम्— कुत एतत् ? ॥

हेतुनिरूपणवार्तिकम्— ※ य्वोरन्यत्र परेणेण् स्यात् ※

व्याख्याभाष्यम्— यत्रेच्छति पूर्वेण, संमृद्य ग्रहणं तत्र करोति—य्वोरिति । तच्च गुरु भवति ॥

ज्ञापकतोपपादनजिज्ञासाभा० कथं कृत्वा ज्ञापकम् ? ।

ज्ञापकतोपपादनभाष्यम्— तत्र विभक्तिनिर्देशे संमृद्य ग्रहणे चार्द्धचतस्रो मात्राः प्रत्याहारग्रहणे पुनस्तिस्रो मात्राः । सोयमेवं लघीयसा न्यासेन सिद्धे सति यद्गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः—परेण, न पूर्वेणेति

बहुप्रयत्ननिवर्त्यसंदेहजनकणकारोपदेशे प्रयोजनजिज्ञासाभा०— किं पुनर्वर्णोत्सत्ताविवायं णकारो द्विरनुबध्यते ? ।

परिभाषासिद्धिप्रयोजननिरूपणवा० ※ व्याख्यानाच्च द्विरुक्तितः ※

व्याख्याभाष्यम्— एतज्ज्ञापयत्याचार्यो—भवत्येषा परिभाषा 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्' इति ।

उपसंहारभाष्यम्— 'अणुदित्सवर्णस्य[1]' इत्येतत्परिहाय पूर्वेणाण्ग्रहणम्, परेणेण्ग्रहणम् इति व्याख्यास्यामः ॥ ६ ॥

प्रत्याहारसूत्रे— ञमङणनम् ॥ ७ ॥ झभञ् ॥ ८ ॥

पूर्वपक्षिण आक्षेपभाष्यम्— किमर्थमिमौ मुखनासिकावचनावुभावनुबध्येते, न ञकार एवानुबध्यते ? ।

प्रत्याक्षेपभाष्यम्— कथं—यानि मकारेण ग्रहणानि ? ।

समाधानभाष्यम्— (सन्तु ञकारेण ।)

यम्प्रत्याहारपाठे पाठजिज्ञासाभा०—(कथं) 'हलो यमां यमि लोपः[2]' इति ।

यञ्प्रत्याहारपाठनिरूपणभाष्यम्—(अस्तु ञकारेण) 'हलो यञां यञि लोप' इति

१—(१।१।६९ ॥) २—(८।४।६४ ॥)

अम्पाठे दूषणभाष्यम्— नैवं शक्यम् । झकारभकारपरयोरपि झकारभकारयोर्लोपः प्रसज्येत ।

समाधानभाष्यम्— न झकारभकारौ झकारभकारयोः स्तः ।

अम्प्रत्याहारपाठेपाठजिज्ञासाभा०—कथं—'पुमः खय्यम् परे'[1] इति ?।

सिद्धान्तिसमाधानभाष्यम्— एतदप्यस्तु ञकारेण 'पुमःखय्यञ्परे' इति ?।

समाधानबाधकभाष्यम्— नैवं शक्यम् । झकारभकारपरेपि हि खयि रुः प्रसज्येत ।

समाधानसाधकभाष्यम्— न झकारभकारपरः खयस्ति ॥

ङम्प्रत्याहारपाठे पाठजिज्ञासाभा०कथं - 'ङमो ह्रस्वादचि ङमुण्नित्यम्'[2] इति ?।

सिद्धान्तिसमाधानभाष्यम्— एतदप्यस्तु ञकारेण 'ङञो ह्रस्वादचि ङञुण्नित्यम्' इति ।

समाधानबाधकभाष्यम्— नैवं शक्यम् । झकारभकारयोरपि हि पदान्तयोर्झकारभकारावागमौ स्याताम् ॥

समाधानसाधकभाष्यम्— न झकारभकारौ पदान्तौ स्तः ।

समाधानबाधकभाष्यम्— एवमपि पञ्चागमास्त्रय आगमिनो वैषम्यात्संख्यातानुदेशो[3] न प्राप्नोति ।

सिद्धान्तिसमाधानभाष्यम्— सन्तु तावद्येषामागमानामागमिनः सन्ति । झकारभकारौ पदान्तौ न स्त इति कृत्वा आगमावपि न भविष्यतः ॥

अक्षरशब्दार्थजिज्ञासाभाष्यम्—अथ किमिदमक्षरमिति ।

अक्षरशब्दार्थबोधकं वार्तिकम्—* 'अक्षरं न क्षरं विद्यात्' *

व्याख्याभाष्यम्— न क्षीयते न क्षरतीति वाऽक्षरम् ।

अक्षरशब्दार्थबोधकवार्तिकम् —* अश्नोतेर्वा सरोऽक्षरम् *

व्याख्याभाष्यम्— अश्नोतेर्वा पुनरयमौणादिकः सरन् प्रत्ययः । अश्नुते इत्यक्षरम् ।

१—(८।३।६) २—(८।३।३२)

३—यथासंख्यमनुदेशः समानाम् १।३।१० ॥

पूर्वाचार्यसंमतार्थबोधकवार्तिकम्-	* 'वर्णं वाहुः पूर्वसूत्रे '[1] १ *
व्याख्याभाष्यम्—	अथवा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते ।
उपदेशप्रयोजनजिज्ञासावा०—	* किमर्थमुपादिश्यते १ *
व्याख्याभाष्यम्—	अथ किमर्थमुपदेशः क्रियते ।
प्रयोजननिरूपणवार्तिकम्	* वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते । तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते २ *
व्याख्याभाष्यम्—	सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते ।
	इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ।

॥ शम् ॥

१—कालापव्याकरणे 'सिद्धोवर्णसमाम्नायः' (१ । १); तै० प्राति० 'अथ वर्णसमाम्नायः (१ । १); वा० प्राति० 'अथातो वर्णसमाम्नायं व्याख्यास्यामः (८ । १)